شیخ احسان اللہ خاں اول با دختر خورد محمد روشن مسماۃ بی بی فرحت
کتخدا شدند ازیں بی بی سہ پسر یکے برہان اللہ خاں دویم غلام صفی کہ لاولد رفتند
سیوم علیم اللہ و دو دختر متولد شدند یکے بی بی زاہدہ اہلیۂ محمد امان بن حاجی ضیاء اللہ
خاں دویم بی بی مریم اہلیۂ ریاض اللہ خاں مرحوم، برہان اللہ خاں مرحوم با دختر
حافظ غلام احمد بن خیر الدین خاں مسماۃ بی بی کریم النساء کتخدا شدند ازیشاں
یک دختر عظیم النساء نام اہلیۂ مولانا مولوی ضیاء اللہ خاں حال مدظلہ العالی متولد شدند
و علیم اللہ با بی بی زینت صبیۂ غلام اشرف خاں مرحوم کتخدا شدند ازیشاں یک پسر
محمد عظیم اللہ خاں مرحوم متولد شدند و با دختر غلام جیلانی خاں بن حامد علی خاں کتخدائی
کردند و لاولد وفات یافتند و نیز از علیم اللہ خاں یک دختر متولد شد کہ با معین الحق
مخاطب بروشن محمد خاں حال کتخدا شدہ لاولد رفت و شیخ احسان اللہ خاں
موصوف بعد وفات والدۂ برہان اللہ خاں صاحب مرحوم با دختر دویمی ابو المعالی
خاں بن بدر الاسلام خاں کتخدائی کردند ازیں بی بی سہ پسر نجم الدین حسین خاں
داماد نصیر الدولہ بہادر کہ ازیشاں چہار پسر متولد شدند، وارث علی خاں داماد دلیر
جنگ خاں بہادر و قمر الدین خاں بہادر داماد نصیر الدین حسین خاں بن صادق
علی خاں و احسان اللہ خاں ثانی داماد انور علی خاں و کریم یار خاں اولاد داماد
ندیم اللہ خاں بن نصیر الدولہ بہادر و ثانیاً داماد محمدی میاں بن اقتدار خاں بن نصیر الدولہ
بہادر دویمی پسر احسان اللہ خاں اول فیض محمد خاں داماد نواب غفرانمآب

ازیشاں دخترے بود اہلیۂ محی الدین حسین خاں عرف سائیں میاں و پسر سیومی احسان اللہ خاں موصوف فضل احمد خاں داماد بدرالاسلام خان حال کہ لاولد رفتند و نیز احسان اللہ خاں را ازیں بی بی چہار دختر بودند یکے اہلیۂ جان جہاں خاں بن خیرالدین خاں دویمی اہلیۂ انور علی خان حال و دو دختر لاولد رفتند و شاہ نجم الدین با دختر شاہ محمد ماہ کتخدا شدند و لاولد رفتند واللہ اعلم بالصواب منہ الابتداء والیہ المآب

ختم شد

॥ वराहमिहिरविरचिता बृहद्यात्रा ॥

श्रीमते रामानुजाय नमः ॥

यस्मिन्नुदयति विकसति कमलमिवास्तं प्रयाति संकुचति ।
सचराचरं त्रिभुवनं स जयति किरणालयः सविता ॥ १ ॥

यक्षेशमेधेन विजित्य धात्रीमित्येवमभ्युद्यमिनो नृपस्य ।
विनिघ्नतो विघ्नकरान्न पापं क्रियात्क्रमेणैव पशून् मखेषु ॥ २ ॥

उत्साहमन्त्रप्रभुशक्तियुक्तो धीमान् विनीतेन्द्रियभृत्यवर्गः ।
प्रजानुरक्तो धृतिमान् सहिष्णुर्वृद्धोपसेवी विजिगीषुरिष्टः ॥ ३ ॥

साम्वत्सरस्तस्य विनीतवेषो धीमान् स्वतन्त्राङ्गपटुः कुलीनः ।
दक्षः प्रगल्भोऽविकलो विनीतस्तादृग्विधस्तस्य पुरोहितोऽपि ॥ ४ ॥

तस्य दैवनरकारसमेतां वर्णयन्ति कवयः फलसिद्धिम् ।
तत्र केचिदवधूय नृकारं दैवमेव फलदायकमाहुः ॥ ५ ॥

लब्धव्यान्येव लभ्यते गन्तव्यान्येव गच्छति ।
प्राप्तव्यान्येव प्राप्नोति दुःखानि च सुखानि च ॥ ६ ॥

उत्थानाच्चेद्भवेत्सिद्धिर्न कश्चित्प्राप्नुयात्फलम् ।
अहोरात्रं विचेष्टन्तो दृश्यन्ते वृत्तिकर्शिताः ॥ ७ ॥

विहङ्ग इव वधो हि(स्यात्) निपत्यार्यमनीश्वरः ।
विधानविहितोऽदेश्यो नान्येषां नात्मनः प्रभुः ॥ ८ ॥

Testimonia:

3 is quoted by Utpala on *yy* 1, 2.

Apparatus:

1b प्रयति B 2a यक्षे] यद्वृन्दे B[2] 2d पश्यून् B 3a उच्छाह°B 3b पुस्थितेंत्रियमृत्यवर्गः B, भविनी over पुस्थि B[2] 3d वृद्धोपजीवी—Utpala 4a विनितवेश्यो B 4d °स्तरदुविध B 7c विचिष्टंतो B 8b निपत्यरयम° B, पापापाय written above B[2]

तस्माद्दैवं प्रधानं हि न कुर्यात्कर्म मानुषम् ।
निश्चेष्टमपि लोकेऽस्मिन् भजते भुक्तिरुत्तमा ॥ ९ ॥

आघातदुर्जयनयं परिभूय दैवमात्माभिमानचपलाः प्रचरन्ति येऽरीन् ।
तेषां चिरादपि कृतान्तमहापशूनां हस्तग्रहं न समुपैति जितापि लक्ष्मी ॥ [१० ॥

तथा परे नापेक्ष्यैव दैवं धैर्यावलम्बिनः ।
प्रत्येक्षिनः क्रियासिद्धौ केवलं जगुरुद्यमम् ॥ ११ ॥

उत्थानहीनो राजा हि बुद्धिमानपि सर्वदा ।
प्रधर्षनीयः शत्रूणां भुजङ्ग इव निर्विषः ॥ १२ ॥

उत्थानधीरः पुरुषो वाग्धीरानधितिष्ठति ।
उत्थानधीरं वाग्धीरा रमयन्त उपास्यन्ते ॥ १३ ॥

विधानगणनाजडः पुरुषकारसुतादरो
मनोरथपरिश्रमैर्न परिचुम्बति श्रीमुखम् ।
पराक्रमविनिश्चितैकसुनयो हि सद्यः श्रुतं
हरिर्मदसुवासितं पिबति कुंजराश्रुं मधु ॥ १४ ॥

कृषिवृष्टिसमानुगा दृश्यन्ते फलसिद्धयः ।
अस्मिन्नर्थे शृणु श्लोकान् द्विपायनमुखोद्गतान् ॥ १५ ॥

न विना मानुषं दैवं दैवं वा मानुषं विना ।
नैकं निर्वर्तयत्यर्थमेकारणिरिवानलम् ॥ १६ ॥

सिद्धयन्ते सर्व आरम्भाः संयोगात्कर्मणोऽर्द्धयोः ।
दैवात् पुरुषकाराच्च न त्वेकस्मात् कथञ्चन ॥ १७ ॥

अनुशास्ति नरं दैवमिहास्येत्यनुशासकः ।
इह नास्य भविष्यामि कुतः फलमनीहितम् ॥ १८ ॥

Apparatus :

9b भूत्ति° B 10b ऽर्य्यान् B 10d समुपैयंति B 11a नपेक्ष्मैव B 12c प्रधर्मनीयः B 14d कुंजराश्वुं B 16c निर्वृत्तपत्य° B 17a सिद्धयंति B 18a अनुश्यास्ति B 18b °मिहस्येत्यनुस्यास्कं B, माहस्वे in marg. B² 18c इहानस्य B 18d फमनिहतः B, लं written above फ B²

यत्नेन सम्पद्य मनुष्यकारं यत्नावकाशो पुरुषो निरुद्धः ।
प्रतीक्षते दैवमतं द्वितीयस्तमापदो नात्मकृताः स्पृशन्ति ॥ १९ ॥

सत्त्वार्जितं कर्मफलं सुखेन विपक्ष्यते राजसमुद्यमे[न] ।
कृच्छ्रेण शेषं महता यतोऽतो भाज्यानि मृग्याणि नृभिर्नृकारैः ॥ २० ॥

इति श्रीवराहमिहिरविरचितायां बृहद्यात्रायां
दैवपुरुषकाराध्यायः प्रथमः ॥

यात्राकालमतः परं मुनिमतान्यालोक्य संख्यापया-
(म्य)भ्युद्धुष्य पृथूक्तमक्षरगुरौ सम्पन्नमीशं भुवः ।
ज्ञाते जन्मनि तस्य यानसमयं वांछन्ति होराविद-
स्त्वज्ञातेऽप्यफलेषु नाक्षरमिव प्राहात्र रत्नावलिम् ॥ १ ॥

विदिते होराराशौ स्थानबलपरिग्रहे ग्रहाणां च ।
आयुषि च परिज्ञाते शुभमशुभं वा फलं वाच्यम् ॥ २ ॥

अन्ये वदन्त्यविदिते (त्व)पि जन्मकाले
योग्यः प्रयाणसमयो मनुजेश्वराणाम् ।
प्रश्नोदयोद्भवफल(ान्वित)सिद्धिभाग्य-
स्तत्त्वार्थविन्निग(द)ति स्म वचो वशिष्ठः ॥ ३ ॥

Testimonia:

1a quoted by Viṣṇuśarman on *VM* 12,31-37 (to लोक्य)

2 equals *TY* 1,4 and is quoted by Govinda on *MC* 11,1.

4 quoted by Rudra on *BJ* 8,2. 5 quoted by Viṣṇuśarman on *VM* 12,1

Apparatus:

19a संपाद्य B 19c त्रितोय° B, द्वि written above त्रि B² 19d नात्म पदो कृताः B 20a शुभं written above फलं B² 20b विपक्ष्यते Cor. to विपच्यते B² Col. बृहज्ज्यात्रायां B

1a. मुनिमतादा° Viṣṇuśarman संखे प्तो वच B 1b म्युद्युरव B °मक्षरा ॥ गुरौ B संपन्नामीशं B 1c वांछति B होयंविद B 2a होराराश्यौ 2b स्थानादिबले Govinda 2d वा फलं] यातुरिह Govinda 3a अन्य B 3c °फलसिद्धिभज्य B 3d तत्वार्थे° B

अपृच्छतः पृच्छतो वा यियासोर्यस्य कस्यचित् ।
होराकेन्द्रत्रिकोणेभ्यस्तस्य विन्द्याच्छुभाशुभम् ॥ ४ ॥

दैवज्ञस्य हि दैवेन सदसत्फलवांछतः ।
अवशो गोचरं मर्त्यः सर्वः समुपनीयते ॥ ५ ॥

अश्रौषीच्च पुरा विष्णोर्ज्ञानार्थं समुपस्थितः ।
वचनं लोकनाथस्य निःसृतं मुखपङ्कजात् ॥ ६ ॥

यत्सारं पृच्छतः पुंसो ग्रहरा(श्या)श्रितं फलम् ।
तत्सारं तस्य जन्म स्याद्य(द्य)प्यन्यगृहे भवेत् ॥ ७ ॥

बुध्वा शास्त्रं यथान्यायं बलाबलविधानतः ।
यथोक्तं जातके सर्वं तथैवात्रापि चिन्तयेत् ॥ ८ ॥

तस्मान्नृपः कुसुमरत्नफलाग्रहस्तः
प्रातः प्रणम्य रवये हरिदिङ्मुखस्थः ।
होराङ्गशास्त्रकुशलान् हितकारिणश्च
संहृत्य दैवगणकान् सकृदेव पृच्छेत ॥ ९ ॥

अथ नृपतिसमीपे दैववित्पृष्टमात्रः
फलमुदयनिमित्तैस्तर्कयेच्छास्त्रदृष्ट्या ।

Testimonia :

8 quoted by Utpala on *YY* 1,2 9 quoted by Rudra on *BJ* 24, 1 9-10 quoted by Govinda on *MC.* 11,1

Apparatus :

4a अपृच्छतो व्यपृच्छतो वा B 4b जिज्ञासो° Rudra 4d °स्तत्र वक्तुः Rudra 5b °वांछकः B 5c गोचरान् Viṣṇuśarman 5d सर्वान् Viṣṇuśarman 6a अश्रोषिच्च B 7b ग्रहोराश्रितं B 7c तस्य तज्जनस्तद्यप्य° B, क्ष ज्ञ written above तज्ज B[2] 8d तथा तदपि Utpala 9a कृष्णरत्न° B, कुसुमपुष्प° Govinda 9b प्राप्तः Govinda हरिदिष्णुखमयः B, सुम स्थः in marg. B[2] 9c °कुशलानि हितकारिणश्नु B सङ्गृह्य Govinda Rudra

सदिति सदसि वाच्यं यद्यपि स्यादसत्तत्
स्फुटमपि कथनीयं भूभुजे मन्त्रिणे वा ॥ १० ॥

सुमधुरफलपुष्पक्षीरवृक्षावृतायां
चरणगतिसुखायां गोशकृत्पेयवत्याम् ।
सलिलकुसुमवत्यां स्नानिनो भद्रमूर्ध्वं
ग्रहभगणगतिज्ञः प्रादिशेत् पृच्छकस्य ॥ ११ ॥

स्तनचरणतलौष्ठाङ्गुष्ठहस्तोपराङ्गं
श्रवणवदननासागुह्यरन्ध्राणि भूपः ।
स्पृशति यदि कराग्रैर्गण्डकटंसकं वा
प्रवदति शुभशब्दं वाहिनी शास्ति शत्रून् ॥ १२ ॥

उदयमुदयपं वा जन्मभं जन्मपं वा
तदुपचयगृहं वा वीक्ष्य लग्ने यियासोः ।
विनिहतमरिपक्षं विद्धि शत्रोरिदं वा
यदि हिबुकसमेतं पृच्छतोऽस्तस्थितं वा ॥ १३ ॥

पार्ष्णिग्राहः पृष्ठतो भास्करस्य प्राग्यातव्यस्तिग्मरश्मेश्च यानः ।
आक्रन्दार्कात् सप्तमे यःस्थितश्च तत्तुल्यास्ते शक्तितश्चिन्तनीयाः ॥ १४ ॥

Testimonia:

13 eqvals Daivajñavallabha 15,24 and is quoted by Viṣṇuśarman on *VM* 12, 1 and by Govinda on *MC* 11,3 15 quoted by Viṣṇuśarman on *VM* 12, 1 after appendix A

Apparatus:

10c सदसि सदिति Govinda स्यात् दसतत B, स्यादनिष्टं Govinda 10d स्पृष्ट°B, स्फुट in marg. B[2] मन्त्रिणे भूभुजे Govinda 11b गोशकृत्पेनवत्यां B 11c श्नातितो B, पृछ written above B[2] 12a °तलौष्टांगुप्तहस्तो सल्मरंगं B 12b °वहन° B 12d वाह्यत: B 13a जन्मभं om. B जन्मपं जन्मभं *DV* 13b °ग्रहं *DV* 13c विनिहित° B 13d यदि हिबुक°] हिबुकगृह° Govinda स्तस्थितं Govinda, सुस्थितं Viṣṇuśarman, स्वस्थितं B[2] 14a पार्ष्टिग्राह B 14b प्राग /// यातव्यस्तिग्मरस्स्मिश्च B नांता written above प्राग B[2] 14c आक्रन्द्यो र्कात् B सप्तमो यस्थ्यितश्च B

जीवज्ञार्कसितापरैः सुतसुहृद्दुश्चिक्कलग्नायगैः
सिद्धार्थोऽरिगणान् विजित्य न चिरात् प्रष्टा समेत्यालयम् ।
लग्ने वा कुजमन्दयोः सुतगते जीवे रवौ कर्मगे
लाभे कर्मणि वा सितेन्दुसुतयोः प्रष्टुर्जयो निश्चितः ॥ १५ ॥

तस्मिन्नेव भवेद्योगे यदि शुक्रोऽष्टमाश्रितः ।
प्रष्टारमुद्यमादेव हतशक्तिर्विशत्यरिः ॥ १६ ॥

गुर्वर्कशशिभिः सिद्धिर्लग्नारिदशमस्थितैः ।
तद्वल्लग्नारिरन्ध्रस्थैर्जीवशुक्रदिवाकरैः ॥ १७ ॥

सचिवासिर्गुरावाये कर्मण्यसितवक्रयोः ।
चतुर्थे ज्ञेऽष्टमे चन्द्रे जायास्थे च सिते जयः ॥ १८ ॥

कर्मण्यारे रवावाये तृतीयस्थेऽर्कनन्दने ।
चन्द्रे षष्ठे विलग्नस्थैः शेषैः प्रष्टुर्ध्रुवो जयः ॥ १९ ॥

सहजेऽर्कार्किभूपुत्रैः सौम्यैर्लग्नगतैर्जयः ।
गुरौ वा लग्नगे पापैर्लाभे कर्मणि वा स्थितैः ॥ २० ॥

माहेयम(न्द)योः षष्ठे लग्ने गुरुशशाङ्कयोः ।
सितचन्द्रजयोरन्ते जयः कर्मणि तीक्ष्णगौ ॥ २१ ॥

इति योगाः शुभाः प्रोक्ताः प्रश्नकाले जयाश्रिताः ।
अशुभास्तु भवन्त्यत्र तान् प्रवक्ष्याम्यतः परम् ॥ २२ ॥

Apparatus:

15a जीवशार्किसुतापरैः Viṣṇuśarman सुतसुहृद्यश्चिकलगनायगैः B 15b सिद्धार्थो B रिगणानि विजित्य B, ऽरिगणा निहत्य Viṣṇuśarman पृष्टा B, प्राप्तः Viṣṇuśarman 15c कुजमन्ययोः B, र written above न्य B[3] 15d सितेन्दु-तनयौ Viṣṇuśarman पृष्टुं जीवो B, प्रश्ने जयो Viṣṇuśarman 16d हतशक्तिर्वि-शत्वरिः B, Corr. to हतशक्तिविभूप B[2] 20b सौम्यैरलग्न° B 20c-d पापैरलाभे B 21d त्रयः B तिक्षणगौ B, in marg, चोष्ण B[2] 22b जयासतः B 22c अशुभाजे भवत्सत्र B

युद्धे भङ्गो यमेन्द्वारैर्नवमात्मजलग्नगैः ।
शशाङ्कयमयोर्लग्ने मृत्युर्भूसुतदृष्टयोः ॥ २३ ॥

सवक्रे निधने मन्दे मृत्युर्लग्ने दिवाकरे ।
चन्द्रेऽस्मिन् त्र्यायमृत्युस्थेससूर्ये वा वदेद्वधम् ॥ २४ ॥

वक्रज्ञशशिभिर्द्यूने प्रष्टुर्नाशोऽपि गच्छतः ।
क्षुन्मारशत्रुवृद्धिश्च लग्ने माहेयशुक्रयोः ॥ २५ ॥

चन्द्रावनीजयोर्मूर्तौ षष्ठे शशिजशुक्रयोः ।
निधनस्थे सहस्रांशौ विज्ञेयो मन्त्रिणो वधः ॥ २६ ॥

तनयस्य वधः प्रष्टुः पापैरुदयपुत्रगैः ।
सचन्द्रे रुधिरे लग्ने भङ्गः सूर्यात्मजेक्षिते ॥ २७ ॥

द्यूननैधनगे चन्द्रे लग्नं याते दिवाकरे ।
विपर्यये वा यातस्य त्रासभङ्गवधागमः ॥ २८ ॥

द्वित्रिकेन्द्रस्थितैः पापैः सौम्यैश्च बलवर्जितैः ।
अष्टमस्थे निशानाथे प्रष्टुर्बन्धवधात्ययाः ॥ २९ ॥

कुजचन्द्रमसोर्द्यूने स्वभेदोऽर्कबुधोदये ।
तद्वन्मन्दारयोर्युद्धे भङ्गः सौम्यार्कयोस्तथा ॥ ३० ॥

Testimonia :

23-35 quoted by Viṣṇuśarman on *VM* 12, 1

27c-28 quoted by Govinda on *MC* 11,5

Apparatus :

23d मृत्युभ्पुंसुत° B, मृत्युर्भूपुत्र° Viṣṇuśarman 24c सचन्द्रे त्र्याय-मृत्युस्थे Viṣṇuśarman, चन्द्रेऽस्मिन्त्रियामृत्युस्थे B 24d वंदे वधं B, वदेद्बुधः Viṣṇuśarman 25a शुक्रज्ञशशितद्द्यूने Viṣṇuśarman 26a चन्द्रावनिजयोः मृत्यो B, सूनौ in marg. B[2] 27 om. Viṣṇuśarman 28a द्युननैधनयोः मन्दे B 28a-b °योश्चन्द्रलग्ने Viṣṇuśarman 28b लग्ने Govinda 28c तस्यैव Viṣṇuśarman 29b सौम्यैः केन्द्राष्टवर्जितैः Viṣṇuśarman 30a °मसौ Viṣṇu-śarman 30b सो मेदो B

सर्वैस्तु नवमे राजा हन्ति मन्त्रिपुरोहितान् ।
योगे ऽस्मिन्नुदये चन्द्रे सुतस्थपतिदेशिकान् ॥ ३१ ॥

अर्कार्किसुतयोर्लग्ने दृष्टयोः क्षितिसूनुना ।
चन्द्रेऽस्ते विबलैः सौम्यैः प्रष्टुः सेनापतेर्वधः ॥ ३२ ॥

निधने वक्रयमयोश्चन्द्रेऽस्ते लग्नगे रवौ ।
ज्ञे तृतीये च विक्रम्य समन्त्री हन्यते नृपः ॥ ३३ ॥

मूर्धोदयं शुभसुहृद्युतवीक्षितं वा
लग्नं शुभाश्च बलिनः शुभवर्गलग्ने ।
सिद्धिप्रदं भवति नेष्टमतोऽन्यथा त-
ज्जन्मप्रयाणफलयुक्तिभिरन्यदुह्यम् ॥ ३४ ॥

निधनहिबुकहोरासप्तमार्थेषु पापा
न शुभफलकराः स्युः पृच्छतां मानवानाम् ।
दशमभवनयुक्तेष्वेषु सौम्याः प्रशस्ताः
सदसदिदमशेषं यानकालेऽपि चिन्त्यम् ॥ ३५ ॥

इति श्रीवराहमिहिरविरचितायां बृहद्यात्रायां प्रश्नाध्यायो द्वितीयः ॥

नन्दा भद्रा विजयाश्चाथ रिक्ताः
पूर्णाश्चैताः फलमेवं विदध्युः ।
नेष्टा मध्या प्रवराश्चेति शुक्ले
कृष्णे चिन्त्यास्तिथयस्ताः प्रतीपाः ॥ १ ॥

Testimonia :

34 om. Viṣṇuśarman 35 quoted by Govinda on *MC* 11, 5. With 1 cf. *TY* 1, 9

Apparatus :

31a सर्वेऽपि Viṣṇuśarman 31a-b राजन् घ्नन्ति Viṣṇuśarman 31c ऽथाथोदये B 32d सनृपते° Viṣṇuśarman 33c ऽपि वाक्रम्य Viṣṇuśarman 34a °विक्षि वा B, तं in marg. B[2] 34b सुभवर्गलग्नं B 34d °रन्यदूदुह्यं B 35a °मर्क्षेषु Viṣṇuśarman Govinda 35c ह्राभभवन° B समस्ताः Govinda 35d या काले B विचिन्त्यम् Viṣṇuśarman Govinda

1c नेष्वाः मध्यः B 1d प्रसिच्याः B, ती च written above B[2], प्रतीपाः *TY*

सर्वाः शस्तास्तिथयः शुक्लपक्षे
हित्वा त्र्यंशं बहुलेऽन्त्यं च कैश्चित्।
षष्ठ्यष्टम्योर्वसुलब्धापि याता
द्वादश्यां वा नाशमाशु प्रयाति ॥ २ ॥

प्रतिपदि फलमेके पञ्चदश्यां च नेष्टं
जगुरिदमिति तज्ज्ञैर्याप्यमेवावधार्यम् ।
किमपि किमपि नूनं तैः समीक्ष्योक्तमेत-
त्समवचनविघाते युक्तता केन चिन्त्या ॥ ३ ॥

बृहद्यात्रायां तिथिगुणाध्यायस्तृतीयः ॥

दिशि दिशि बहुलाद्याः सप्तकाः प्राक्प्रवृत्ताः
पवनदहनदिक्स्थस्तिर्यगत्युग्रदण्डः ।
सुरपतिरपि कृच्छ्रं याति तं लंघयित्वा
ननु भवति विरोधो दिक्षु दण्डैकगासु ॥ १ ॥

Testimonia :

3 quoted by Viṣṇuśarman on *VM* 12, 6

1 quoted by Utpala on *YY* 5, 1, by Viṣṇuśarman on *VM* 12, 2, and by Govinda on *MC* 11, 36 ; 1a दिशि दिश बहुलाद्याः quoted by Utpala on *BS* 42, 12 2a-b quoted by Viṣṇuśarman on *VM* 12, 5 2c-d quoted by Utpala on *YY* 5, 2 and by Govinda on *MC* 11,37. 3 quoted by Viṣṇuśarman on *VM* 12, 4 4 quoted by Viṣṇuśarman on *VM* 12, 4

Apparatus :

2a शस्ता° B 2c षष्ठांष्टम्वो° B, षष्ठ्यष्टस्यो in marg. B[2] 3b तज्ज्ञैः वाच्यते Viṣṇuśarman 3c सामीक्षोक्त° B °मेवं Viṣṇuśarman 3d च्छेमवचविघाते B Col. सिंदगुणा° B

1a दिशि च हुतभुगाद्याः सप्त ताराः प्रवृत्ताः Viṣṇuśarman °द्यास्तारका सप्त लेख्याः Govinda 1b °दिकुस्त्रियंगत्युग्रदंडः B, °दिक्स्थं तिर्यगुग्रम्य दण्डम् Viṣṇuśarman 1d न तु B, न हि Govinda निरोधो Utpala

प्राग्द्वारिकैरनलदिङ् न विरोधमेति
    शेषाः प्रदक्षिणगताः विदिशः प्रकल्प्याः ।
उल्लंघ्य दण्डमपि काममियान्नरेन्द्रः
    शूलं विहाय यदि दिङ्मुखलग्नशुद्धिः ॥ २ ॥

ज्येष्ठायां पुरुहूतदिङ्मुखगतः प्राप्तो बलिर्बन्धनं
    याम्यामाजपदे मुरश्चलितवान् यातो मुरारेर्वशम् ।
रोहिण्यां नमुचिः प्रतीच्यभिगतः पूर्तिं गतो वज्रिणा
    सौम्यामर्यमदैवते च गतवान् मृत्योर्वशं शम्बरः ॥ ३ ॥

पुष्योऽथ हस्तः श्रवणः श्रविष्ठा प्राच्यादिमुख्यान्युदगश्वियुक् च ।
नैशाकरं त्वाष्ट्रमथानुराधा पौष्णं च मध्यानि तथाहुरेके ॥ ४ ॥

सर्वद्वारिकसंज्ञितानि गुरुभं हस्ताश्विमैत्राणि च
    श्रेष्ठान्यैन्दवपौष्णविष्णुवसुभान्याद्यैः सहाष्टौ सदा ।
रौद्राजाहियमानिलानलमघाशाक्ताग्निभिर्निन्दितं
    यानं त्वष्ट्रनिलान्तरेऽग्नियमयोः पित्र्योरजे चान्तरे ॥ ५ ॥

स्वे स्वे कर्मणि पूजितानि मुनिभिः शुद्धानि सर्वाण्यपि
    त्यक्त्वार्कोदयमानले ऽरिविषयं यात्रा दिधक्षोः शुभा ।
रोहिण्यां त्रिषु चोत्तरेषु विजयो यातुर्विशाखासु च
    त्यक्त्वा वासरपूर्वभागमवदद्गर्गोऽधिराज्यार्थिनः ॥ ६ ॥

Testimonia:

5a-b quoted by Govinda on *MC* 11, 39 6-7 quoted by Viṣṇuśarman on *VM* 12, 4

Apparatus :

2b विदिशं Viṣṇuśarman 2d यदि भस्य विलग्नशुद्धिः Govinda 3a पुरुहित° B 3b मूश्चलित्वान B, मुरश्च गतवान् Viṣṇuśarman 3c नमृति B प्रतीचभक्तं शूर्णक्रितो B 3d °मर्यमव्धैवते च B, °मुत्तरफल्गुनीषु Viṣṇuśarman गत्वान् B, 4a युद्धो B धनिष्ठा Viṣṇuśarman 4b °गाश्वयुक् च Viṣṇuśarman 4c वैश्याकरं B त्वाष्ट्रमखानुराधाः Viṣṇuśarman 5a सर्वद्वारग° Govinda 5b सहार्षौ B 5c °शक्ताग्नि° B 6a शुज्ञानि B, द्ध written above ज्ञ B[2] 6b तिविषयं Viṣṇuśarman 6c चोत्तरासु Viṣṇuśarman 6d °दूग्रगो B, °द्गार्ग्यो Viṣṇuśarman

मूलेन्दूरगशक्रेष्वरिवधे यायाद्दिनार्धे विना
भृत्यर्थं पवनाश्विसूर्यगुरुभेष्वह्नोऽपरार्धे विना ।
रात्र्यादौ तु न पौष्णमैत्रशशिभत्वाष्ट्रेषु वांछन्द्युतिं
रात्रेर्मध्यमपास्य पूर्वभरणीपित्र्येषु हन्तुं पराः ॥ ७ ॥

निशान्तभागे त्रिषु वैष्णवाद्येष्वियाद्धनार्थी न पुनर्वसौ च ।
निषेधयन्त्यम्बुपसंज्ञकस्य मध्याह्नमेके सनिशान्तभागम् ॥ ८ ॥

यथेष्टवेलागमनं प्रशस्तं हस्तैन्दवोपेन्द्रसुरेज्यभेषु ।
कृत्वा प्रयाणं श्रवणे श्रियोऽर्थी विशेन्न जातुः क्षितिपः स्वसीम्नि ॥ ९ ॥

सौम्ये गत्वाध्युष्य रौद्रेऽदितीशे संप्रस्थाता बाधते शत्रुसंघान् ।
मैत्रे गत्वा पौरुहूते समुष्य मूले यायाच्छत्रुनाशाय भूपः ॥ १० ॥

हस्ते गत्वा स्वातिचित्रे समुष्य शक्राग्न्यृक्षे प्रस्थितो बाधतेऽरीन् ।
तिष्ये पौष्णे वासवे चैकरात्रं सीम्नि स्थित्वा भूतिमाप्नोति याता ॥ ११ ॥

ऋक्षे पापैः संयुतेऽन्तः प्रकोपो लक्ष्मीभ्रंशो राहुणार्केण रोगः ।
केतूल्काभ्यां पीडिते देशनाशः क्लेशः सौरे सोष्णरश्म्यात्मजे च ॥ १२ ॥

दिङ्म(र्ग)धूपपरिवेशविकम्पपांसुयुक्तेष्वथानयगदश्रमरोगपीडाः ।
भिन्ने ग्रहेण वशतामुपयाति शत्रोः सन्ध्यारात्रे शनिहते ऽजविघात उक्तः ॥ १३ ॥

जन्मादि कर्म ततो दशन्न(व)मं संघातिकं चोडुभागम् ।
समुदयम(ा)द्याद्दश(मं) श्रमविनाशसंज्ञं च त्रयोविंशम् ॥ १४ ॥

Testimonia :

9 quoted by Govinda on *MC* 11,52-53

10-11 quoted by Govinda on *MC* 11, 52-53

Apparatus :

7a मूलेंद्रोरगनांकरेश्वे B यायादिनाद्धह्विते B 7b भूत्यर्थं B 7c पौष्णमित्रशशिभे त्वाष्ट्रेषु Viṣṇuśarman चाजद्युतिं Viṣṇuśarman 7d रात्रौ मध्य° Viṣṇuśarman परान् B, सुराः Viṣṇuśarman 9b °सुरेशभेषु Govinda 9d वसेन्न Govinda क्षियतियः स्वसीस्ति B 10a शोम्ये B धुष्व B, Corr. to ध्युष्म B[2] 10b बाधतं B 10c पौरुरुतं B समुष्व B 10d नपः B 11a नत्वा Govinda 11b श्यक्राग्न्याक्षै B, शुक्राग्न्योर्भे Govinda 12a द्वांधैः B, Corr. to च्चांधैः B[2] 12d सोष्णरस्मकत्वमजे B, in marg. श्यम्यात्मजे B[2] 13a °विलश्रम्यषामृशु° B, विफंरयंसु wr. above B[2]

आद्यात्तु पंचविंशं मानसमेतं नरः षडृक्षः स्यात् ।
मानवनक्षत्रो नृपतिराद्यात्तदेवाभिषेकर्क्षम् ॥ १५ ॥

नामानुरूपमेषां सदसत्फलमिष्टपापगुणदोषैः ।
जन्मर्क्षादिविशुद्धौ याता शत्रून् जयत्यचिरात् ॥ १६ ॥

जन्मभकर्माधानोदितास्तु सम्पद्विपत्कराः क्षेमाः ।
प्रत्यरिसाधकवैनाशिकाः स्युर्मित्रातिमित्रे च ॥ १७ ॥

मित्रातिमित्रसाधकसम्पदः क्षेमेषु कर्मभे यथा ।
प्राप्नोति नावशेषेष्वभिषेकपुरस्ताद्यातस्तु ॥ १८ ॥

सितसिद्धार्थकशालिप्रियङ्गुमदयन्तिकाम्बुभिः पुष्ये ।
स्नात्वा यायात् प्राचीं सौम्ये सहस्रमणितोयैः ॥ १९ ॥

गोशृङ्गाप्यनदीगिरिवल्मीकतडागमृत्समायुक्तैः ।
तोयैः स्नात्वा नृपतिर्यायाद्याम्यां दिशं हस्ते ॥ २० ॥

सरिद्भ्याकुलमृद्भिः स्नात्वा (च)मैत्रे प्राग्दिशं यायात् ।
श्रवणे तु नदीसङ्गममृत्सलिलैः पश्चिमामेव ॥ २१ ॥

मधुभद्रदारुसहितैः स्नात्वा तोयैरुदक् श्रविष्ठासु ।
गोगजविषाणकोशैर्मधुघृतपूर्णैरुदक् पौष्णे ॥ २२ ॥

Testimonia :

16-17=2 cf. *TY* 1, 20

Apparatus :

15b षडुक्ष स्यात् B, in marg. षड्ऋक्षकः पुरुषः B[2] 15d °राजातदेशाभिषेकरक्षैः B 16a नामानुरुग्मेषां 16b सदसंगल° B 16c °विसुद्धौ B 16d शत्रुन् B 17a जन्माभ° B 17b °दितस्तु संवद्धिपत्करक्षेमा B 17c प्रयत्रटयाध° B 17d °सिकाश्रुमित्रा° B 18b संपतक्षेमषु B गथान् B 18c नावशेष्वेष्व B 18d पुरक्षयातश्रु B 19c याया B 19d सहममनि° B 20a गोश्टङ्गाषनदि° B 20b °वल्मिकि° B °मृछमायुक्ते B 20d °यर्यियादिज्याम्यां B, च्चास्य in marg. B[2] 21a सरिदुभकुल° B, य in marg. B[2] 21b प्रादिशं B, चीं written above B[2] 21d °मृछ° B, त्स written above B[2] पश्चिमोमेव B 22c °कोपै° B 22d पौषणा B, ष्णे written above B[2]

उदग्वै वैश्वदेवे स्नात्वा मधुपूथिकापूर्तसलिलैः ।
नक्षत्रदेवमन्त्रैश्चाग्निं हुत्वा जयं लभते ॥ २३ ॥

अक्षतमाषाः खिन्नास्तिलसहितास्तण्डुला दधि च गव्यम् ।
वृषभपिशितं मृगस्य च पञ्चानामाश्विनादीनाम् ॥ २४ ॥

रुधिरविलायनपायसभुजङ्गमांसानि शाङ्करादीनाम् ।
पित्र्ये तिलौदनं षष्टिकान्नमृक्षद्वये परतः ॥ २५ ॥

प्राश्याः प्रियङ्गुचित्राण्डजाः फलं यावकं कुलत्थाश्च ।
मधुसर्पिषी च हस्तान्मूलान्यम्बूनि सक्तवो मूलात् ॥ २६ ॥

श्रवणादीनामद्याच्छालिं शाकं बिडालमांसं च ।
आज्यं यथेष्टमांसं च सक्तवो माषसंयुक्ताः ॥ २७ ॥

प्राश्यादि घृतं तिलौदनं मत्स्याः क्षीरमिति प्रदक्षिणम् ।
अद्यान्नृपतिर्यथादिशं नक्षत्राभिहितं च सिद्धये ॥ २८ ॥

अस्वादु च्युतकचमक्षिकानुविद्धं दुर्गन्धि क्षयकृदभूरि यच्च दग्धम् ।
सुस्विन्नं मृदु रुचिरं मनोनुकूलं स्वाद्वन्नं बहु विजयाय यानकाले ॥ २९ ॥

Testimonia :

24-28 equal *YY* 7,15-20 26a-b is quoted by Govinda on *MC* 11, 84-85 29 is quoted by Śivarāja (p. 208)

Apparatus :

23a उदशेवाशुनदेवे B, शणे written above B² 23b °पूर्तैसलिलैः B 23c °दे° om. B, in marg. B² 23d °श्चाग्नि B 24a स्विला° B 24c पृषतपिश्वतं B, श written above श्व B² 25b शोकादिना B 25c पित्रे B 25d °मृक्षद्वयोपरजः B 26a-b °चित्रार्नजाः B 26c °सर्पिषि B 26d न्यापः शक्रथवो B 27a-b °मद्याशालिं B 27c आजं B जेघेष्टमांसं B 27d सकथवो मांषसंपृक्ताश्रु B 28a प्राच्यादि B तिल उदनं B 29a मक्षिकाकचसिकतानुविद्धं Śivarāja 29b क्षयकृ भूरि यक्षजगवम् B 29c मुखिनं B, स्वस्विन्नं Śivarāja मृदु उरं मनोनुकूलं B सुचिरं मनोनुकूलं Śivarāja 29d स्वाद्यनं B बहु च जयाय Śivarāja

गुणवति तिथावृक्षेऽनिष्टे दिवा गमनं हितं
निशि च भगणे शस्तं यानं तिथौ गुणवर्जिते ।
भतिथिगदितान् दोषान् प्राप्नोत्यतः प्रतिलोमगो
गुणमपि तयोः सम्यग्यातुर्जगाद भृगुर्मुनिः ॥ ३० ॥

बृहद्यात्रायां नक्षत्रबलाध्यायश्चतुर्थः ॥

उदरनयनरोगश्वापदारण्यबाधाः
सवितृदिवसयाताप्यश्नुतेऽर्थक्षयं च ।
अनिलकफजरोगान् शक्तिमानान्नहानिं
सलिलजनितपीडां चाह्नि याता हिमांशोः ॥ १ ॥

ज्वलनवधविषासृक्पित्तरुक् शत्रुपीडा-
मवनिजदिनयाता बाध्यते शत्रुसंघैः ।
अहनि सवितृसूनोर्दैन्यमाप्नोति गच्छन्
स्वजनधनवियोगं मृत्युबन्धामयांश्च ॥ २ ॥

Testimonia :

30 is cited by Viṣṇuśarman on *VM* 12, 6

1-4b is cited by Viṣṇuśarman on *V M* 12,8 1a is cited by Utpala on *B S* 42, 12

Apparatus :

30a तथा°B निघे B 30b भगणैः B, भगुणे Viṣṇuśarman शास्त्रं यानं B, यानं शस्तं Viṣṇuśarman 30c ङतिथि B °गताद्दोशात् Viṣṇuśarman प्रति-लोमतः Viṣṇuśarman 30d सयोः B

1 M Begins श्रीः हरिः ओम् । श्रीः 1a °रोगोश्वा° B, रोगांश्वा M, °रोगश्व° Utpala 1b सवितुर्दिवशयातो । B व्यश्नुते B, ह्यश्नुते Viṣṇuśarman ऽर्घक्षयं Viṣṇuśarman 1c °रोगाच्छक्तिपाना° Viṣṇuśarman 2a °पित्तरुक्° om. Viṣṇuśaraman °शस्त्रपीडा° B post °पीडा° add °मसह्या° Viṣṇuśarman 2b °यातो° B M साध्यते Viṣṇuśarman चारिसंहैः B, घैः in marg. B[2] 2c सविभुशुनो° B गन्ता M

बुधदिवसगतोऽरीन् बाधते मन्त्रशक्त्या
श्रवणसुखकथार्सि शिल्पिमित्रागमांश्च ।
क्षितिधनजयरत्नस्त्रीप्रतापप्रमोदा-
नतिबलमचिरेण स्वीकरोत्यह्नि सूरेः ॥ ३ ॥

प्रवरयुवतिशय्यावस्त्रगन्धान्नपान-
स्मरसुखधनरत्नान्यह्नि भुंक्ते सितस्य ।
अनुपचयगतोऽह्नः शस्तमप्यप्रशस्तं
शुभमुपचयसंस्थः पापसंज्ञो विधत्ते ॥ ४ ॥

बृहद्यात्रायां वारफलाध्यायः पञ्चमः ॥

गरवणिजविष्टिपरिवर्जितानि करणानि यातुरिष्टानि ।
गरमपि कैश्चिच्छस्तं वणिजं च वणिक्क्रियास्वेव ॥ १ ॥

शिवभुजगमित्रपितृवसुजलविश्वविरिञ्चिपङ्कजप्रभवाः ।
इन्द्राग्नीन्द्रनिशाचरवरुणार्यमयोनयश्चाह्नि ॥ २ ॥

रुद्राजाहिर्बुध्न्याः पूषादस्रान्तकाग्निधातारः ।
इन्द्वदितिगुरुहरिरवित्वष्ट्रनिलाख्याः क्षणा रात्रौ ॥ ३ ॥

Testimonia :

1-6=*TY* 3, 1-6 1 Cited by Viṣṇuśarman on *VM* 12, 6 1a-b Cited by Utpala on *BS* 42, 12 2-6 Cited by Utpala on *BS* 98, 1-3 and on *YY* 5, 10 2-4 Cited by Utpala on *BS* 42, 12; on *BS* 97, 12; and on *YY* 2, 35.

Apparatus :

3a बाध्यते B 3b °कथसुखा °M° स्त्रीशिल्प° Viṣṇuśarman 3c क्षितजयवररत्न° Viṣṇuśarman °चित्रप्रमोदप्रतापा° M, °श्रीप्रभावप्रमोदा° B 3d °नरिबल° B, °नरकुल° Viṣṇuśraman °मचीराह स्त्रि° B 4b भुंजेऽपि तस्य M 4c गताः शस्त्र° B, °गताहरशस्त° M 4d पि धत्ते B Col. इति महायात्रायां ग्रहदिनाध्यायः पञ्चमः M

1a खर° B 1d वणिजां *TY* च] हि Viṣṇuśarman 2b °विरिंचि° *TY* 3c चन्द्रादिति° Utpala on *BS* 42, 12 3d °त्वष्टृनिलाक्षाक्षेणाः B, °त्वाष्ट्राण्यनिलाख्यका Utpala on *BS* 42, 12 रात्रौ] त्रौ M

अह्नः पञ्चदशांशो रात्रेश्चैवं मुहूर्त इति संज्ञा ।
स च विज्ञेयस्तज्ज्ञैश्छायायन्त्राम्बुभिर्युक्त्या ॥ ४ ॥

नक्षत्रवत् क्षणानां परिघादि तदीश्वरैः समं चिन्त्यं ।
फलमपि तदेव दृष्टं गर्गाद्यैस्तत्र च श्लोकाः ॥ ५ ॥

अहोरात्रं च सम्पूर्णं चन्द्रनक्षत्रयोजितम् ।
तन्नक्षत्रमुहूर्ताश्च समकर्मगुणाः स्मृताः ॥ ६ ॥

अष्टमेऽर्धदिवसे समे शुभो यो विरिञ्चविभुसंज्ञितः क्षणः ।
तेन यानमपहाय दक्षिणां सर्वदिक्ष्वभिजिता प्रशस्यते ॥ ७ ॥

बृहद्यात्रायां मुहूर्तगुणाध्यायः षष्ठः ॥

सत्य आह गतिकर्मकल्पहा जन्मगस्तु हिमगुर्यियासतः ।
तत्र देहनवतेऽवजायते तेन कर्मसु न साधकः स्मृतः ॥ १ ॥

तच्च तस्य बहुभिर्विशोधितं लग्नमेव सुतरां यतस्तनुः ।
तुल्यदेहनवतां प्रपद्य किं सोदयोदयमुवाच शोभनम् ॥ २ ॥

Testimonia

7=*Ty* 3, 8

Apparatus

4b रात्रे°]त्रे° B °श्चायं M 4c °तज्ज्ञै° om. Utpla on *BS* 42, 12 5a नक्षत्रवक्षनानां B, नक्षत्रवक्ष्यमाणानां Utpala on *YY* 5, 10, नक्षत्रतत्क्षणानां Utpala on *BS* 98, 1-3 5b परिपादितदिश्वटः B, परिघातादीश्वरैः Utpala on *BS* 98, 1-3 समश्चिन्त्यम् M 5d गर्गाद्यपराशरश्लोकैः Utpala on *BS* 98, 1-3 च om. Utpala on *YY* 5, 10 श्लोक B 6a तन् om. M नक्षत्राणां मुहूर्ताश्च M 7a अष्टमेन *TY* 7b विरंचि° B क्षता: B 7d प्रणश्यंते B Col. इति महायात्रायां मुहूर्तगणनाध्यायःषष्ठः M

1a सत्यवाहमति° B 1b जन्मनिस्तु M हिनगुरु°B, हिनग° M 1c-d °ते तेन कर्मसु om. M 2c °दहि° M 2c-d °नवतां प्रपद्य किं सो om. M 2d सोरभन B

अष्टवर्गपरिशोधितः शशी श्रेष्ठतां समनुवर्तते यदा ।
जन्मगोऽपि हि तदा प्रशस्यते योऽष्टवर्गशुभदः स शोभनः ॥ ३ ॥

सप्तमायदशषट्त्रिजन्मगो नेष्टदो द्विनिधनोपगैर्ग्रहैः ।
बन्धुरिःफनवपञ्चमस्थितैश्चेष्टदो यदि विलोमवेश्मगः ॥ ४ ॥

यस्य गोचरफलप्रमाणता तस्य वेधफलमिष्यते न वा ।
प्रायशो न बहुसंमतं त्विदं स्थूलमार्गफलदो हि गोचरः ॥ ५ ॥

यस्योत्सृजत्युडुपतिः पुरुषोऽपसव्यं
जन्मर्क्षमापदमुपैति स भूमिपालः ।
यायी तथेतरगृहोपगते सितादौ
यायीतरेश्वरजयो बहुळे क्षयश्च ॥ ६ ॥

होराराशावुपचयगृहे जन्मभे वा यियासो-
र्हानिर्हीनावुडुगणपतौ वृद्धिरापूर्यमाणे ।
पक्षस्यादावपचयगृहे हानिरापूर्यमाणे
वृद्धिस्तूक्ता ह्रसति हिमगौ कृष्णपक्षादिसंस्थे ॥ ७ ॥

Testimonia :

3 and 6 cited by Viṣṇuśarman on *VM* 12,13. 5 cited by Utpala on *BJ* 9, 8. 7=*T Y* 4, 4 fn. 8-9 Cited by Viṣṇuśarman on *V M* 12, 13 10 Cited by Viṣṇuśarman on *V M* 12, 17

Apparatus :

3b श्रेष्टभां B, श्रेष्ठितां M सदा B 3b-c यदा जन्मगोऽपि हि om. M 3c प्रणश्यते B 4a °मायविरशषट्° B 4b °परैर्गृहैः B, om. M 4c-d °स्थितैः श्रेष्ठदो B 4d °वेधगः B 5a-d फलप्रमाणता to गोचरः om. M 5b मिच्यते B 5c बहुषु संमतं Utpala 6a यस्योत्सुतत्यु° M पुरुष्ये B पुरुषोऽपसव्यं Om. M 6c यायीतरग्रहगृहोपगते B, यायितनरः ग्रहगृहोपगतै M तदादौ Viṣṇuśarman 6c-d °दौ यायीतरेश्वरजयो ब° om. M 6d बहुले B, इगुले M, बहुवे Viṣṇuśarman क्षणाय Viṣṇuśarman 7a-c जन्मभे to °गृहे Om. M 7a यियासोर-B 7b हानिर्हीनावु° B, उ written above वु B^2 7c पक्षस्थादा° *TY* °दापचय° B, वु written above प B^2 7d पक्षादिसंस्थे Om. M

उपचयगृहयुक्तः सव्यगः शुक्लपक्षे
शुभमभिलषमाणः सौम्यमध्यस्थितो वा ।
सखिवशिगृहयुक्तः कारकर्क्षेऽपि चेन्दु-
र्जयसुखफलदाता तत्प्रहर्तान्यथातः ॥ ८ ॥

प्रक्षीणेऽप्यनुपचयस्थितेऽपि याया-
द्विश्रब्धं यदि सखिवश्यकारकर्क्षे ।
नैवं चेदुदयगृहात् स्वजन्मभाद्वा
सम्पूर्णेऽप्युपचयगेऽपि न प्रयायात् ॥ ९ ॥

भृगुसुतबुधभिन्ने रुक् सुरेड्येन मृत्यु-
र्भयमसितकुजाभ्यां केतुना स्त्रीप्रणाशः ।
अपटुकिरणकान्तौ गच्छतः शत्रुवृद्धिः
सविकृतपरिवेषे नेत्रनाशः शशाङ्के ॥ १० ॥

इति बृहद्यात्रायां चन्द्रबलाध्यायः सप्तमः ॥ ७ ॥

द्विपदवशगाः सर्वे सिंहं विहाय चतुष्पदाः
सलिलनिलयाभक्ष्यावश्याः सरीसृपजातयः ।
मृगपतिवशे तिष्ठन्त्येते विहाय सरीसृपान्
न कथितगृहेषूह्यं वश्यं जनव्यवहारतः ॥ १ ॥

Apparatus :

8a उपचय Om. M °करयुक्तः B, °ग्रहयुतः M 8b भिलसमाणः B, °भिवशमान Viṣṇuśarman 8c सविवशि° M, स हि वशि° Viṣṇuśarman •फल° M, °धन° Viṣṇuśarman Om. B 9a प्रदक्षिणे M 9b °द्विस्रम्भो M, °द्विस्रब्धं Viṣṇuśarman शिखि° Viṣṇuśarman 9c °दयग्रहान् M 10a °भिन्ने रुक B, °भिन्नेरुत् M °भिन्नैः रुक् Viṣṇuśarman सुरेज्येन B 10b स्ति प्रणाशः B, स्त्रीविनाशः Viṣṇuśarman 10c अपशु° Viṣṇuśarman शत्रुवृद्धौ Viṣṇu-śarman 10d सविक्रपरिवेशे B, सविकृतपरिवेष्टा Viṣṇuśarman त्रोरोगः M, तेनं नाशं Viṣṇuśarman Col. इति om. B इति महायात्रायां चन्द्रबलाध्यायः सप्तमः M

1b °निलयावश्या भक्त्या M 1c सरिसृपा B 1d °गृहेषूद्यं B जनव्य-हारतः B

स्थलजलजसरीसृपाः स्वकानां बलमभिवीक्ष्य विधेयतां भजन्ते ।
विषमगृहवशे समा द्युसंस्था निशि विषमा वशवर्तिनः समानाम् ॥ २ ॥

शीर्षोदये समभिवांछितकार्यसिद्धिः
पृष्ठोदये विफलतां बलविद्रवश्च ।
यातव्यदिङ्मुखगतस्य सुखेन सिद्धि-
र्व्यर्थश्रमो भवति दिक्प्रतिलोमलग्ने ॥ ३ ॥

शस्तं दिवा दिनबले निशि नक्तवीर्ये राशौ विपर्ययबले गमनं न शस्तम् ।
इन्द्वर्कलग्नसहितेषु गमश्चराद्येष्वन्यस्वकोभयमहीप्रतिवृद्धिदाता ॥ ४ ॥

मीनोदये प्रवसतः कुटिलः सदोषो मार्गो भवत्यकृतकार्यनिवर्तनं च ।
अन्यांशकेष्वपि झषे फलमेतदेव मीनांशकेषु च परर्क्षसमाश्रितेषु ॥ ५ ॥

रिपुनिधने रिपुनिधनं रिपुषष्ठे लग्नगे वधो यातुः ।
सत्यानुशासनमिदं वासिष्ठे नायमेकान्तः ॥ ६ ॥

शत्रोः प्रसूतिसमये यदि निधनं संयुतं ग्रहैः पापैः ।
सौम्ययुतं वा षष्ठं सदसत्फलता ततस्ताभ्याम् ॥ ७ ॥

क्लेशाद्विना फलमरिक्षयमर्थसिद्धिं
प्राप्नोति लग्नसहिते प्रवसन् स्वलग्ने ।

Testimonia

2 Cited by Viṣṇuśarman on *VM* 12, 11 3 = *TY* 5, 4 fn. 3a-b Cited by Viṣṇuśarman on *VM* 12, 14 3c-d Cited by Govinda on *MC* 11, 47 4a-b Cited by Viṣṇuśarman on *VM* 12, 14 6a-b *TY* 5, 2a-b 7 a-b=*TY* 5, 3 fn.

Apparatus :

2a °जलसरी° Viṣṇuśarman 2d षिक्षमा M समवर्तिनः समानाः Viṣṇuśarman 3a °वांचति कार्यसिद्धिं Viṣṇuśarman 3b विफलतां] ऽपि.... Viṣṇuśarman 3c यातस्य M °दिक्तनुगतस्य Govinda 3d दिक्प्रतिकूल-लग्ने M 4a शस्तो M, शस्ता Viṣṇuśarman 4b °बलिन्युदिते न शस्तः M, °बले तु गमोऽप्यनिष्टः Viṣṇuśarman 5a प्रविशतः B 5c रुषे B 5d °शवेष्वपि M 6a रिपुनैधने रिपुवधो *Ty* रिपुनिधने om. M 6b प्राग्लग्ने शत्रुशत्रुभे यातुः M 6d नामयेकान्तः M 7a प्रसृति° BM 7b गृहैः B

अर्थक्षयं श्रममनर्थमतो द्वितीये
कल्याणसौख्यविभवागममाहुरेके ॥ ८ ॥
भृत्यार्थवाहनसहायजयास्तृतीये
बन्धार्थनाशभयसैन्यवधाश्चतुर्थे ।
मन्त्रोपजापविपदात्मजभेऽरिवृद्धिः
षष्ठेऽरिवित्तबलदीप्तिजयागमाश्च ॥ ९ ॥
द्यूनेऽध्ववाहनविपत्क्षुदतिश्रमार्ति-
र्बन्धो वधः परिभवो निधने रुजश्च ।
धर्मेऽर्थनाशगदकार्यविपद्भयानि
कार्यं विना बलभयं दशमे क्षयश्च ॥ १० ॥
केचिद्वदन्त्युपचयोपगृहीतमेतत्
तस्माच्छुभं दशमभे गमनं विलग्ने ।
अर्थाप्तिदीप्तिशुभसिद्धिजयाश्च लाभे
रिष्फे छलं व्ययभये विजितेऽपि भेदः ॥ ११ ॥
रोगाज्जन्मगृहोदये सुतवधोऽसिद्धिश्च तत्पञ्चमे
द्यूने क्लेशमवाप्य जन्मभवनात् प्राप्नोति पश्चात्सुखम् ।
मार्गादिव निवर्तनं नवमभे मेषूरणेऽर्थागमः
शेषर्क्षेषु यथैव लग्नभवनात्तद्वत्फलं जन्मतः ॥ १२ ॥

Testimonia :

8-11 cited by Viṣṇuśarman on *V M* 12, 12 12 cited by Viṣṇuśarman on *VM* 12, 12

Apparatus :

8d कार्यर्थिसौख्य° M 9b बन्ध्वर्थ° M, गन्धार्थ Viṣṇuśarman °सैन्य-लया° Viṣṇuśarman 9d षष्ठेऽरिवित्त° om. M °बल°] °जय° M °दीप्त° Viṣṇuśarman 10a °श्रमार्थी° M 10c° गतकार्य° M 10d कार्याद्विना B 11a °हीतचेतं° M 11c °सन्धिजयं च Viṣṇuśarman 11d फलं M व्यचभये M, व्ययजयौ B, व्ययभवे Viṣṇuśarman 12a रोगो B जन्महृदो° M सुतवयः M, सुतवधू° Viṣṇuśarman 12b °भवसुनात् B पश्चाज्जयम् M 12c मेषूरतो B, मे in marg. B[2]

क्षुत्तृष्णार्तिर्मार्गनाशोऽक्षिरोगः
क्लेशावाप्तिस्तिग्मगोः प्राग्विलग्ने ।
शस्ता चान्द्रे देवतार्थं स्वदेशे
कौजे पित्तव्यालशस्त्राग्निपीडा ॥ १३ ॥

बौधे तुष्टिर्वाञ्छितास्त्यर्थशश्च
जैवेऽर्थाप्तिः स्थानमानारिनाशाः ।
स्त्रीरत्नाप्तिः कार्यसिद्धिश्च शौक्रे
मान्दे बन्धव्याधिनीचावमानाः ॥ १४ ॥

सौम्योऽपि जन्मनि न यः शुभपुष्टिदाता
स्थानं न तस्य शुभदं व्रजतो विलग्ने ।
पापोऽपि यः शुभफलं प्रकरोति पुंसां
स्थानं विलग्नगतमिष्टमुशन्ति तस्य ॥ १५ ॥

अविधेयं भवनं यत् स्वजन्मलग्नर्क्षयोः प्रयातॄणाम् ।
अप्यनुकूलं लग्नं धनक्षयायासदं भवति ॥ १६ ॥

सखिवश्यतामुपेते स्वजन्मलग्नर्क्षयोर्विलग्नर्क्षे ।
अपचयकरेऽपि यातुर्जयधनमानागमाः क्षिप्रम् ॥ १७ ॥

Testimonia :

13–14=*Daivajñavallabha* 15, 26-27 and cited by Viṣṇuśarman on *VM* 12,14 15-17=cited by Viṣṇuśarman on *VM* 12, 11

Apparatus :

13b क्लेशप्राप्ति B, क्लेशस्याप्ति° *Daivajñavallabha* °स्तिग्मगौ M 13c शस्तं *Daivajñavallabha* चान्त्रे B, चन्द्रे in marg B[2] 14a पुष्टि° Viṣṇuśarman 14b स्थानमानो Viṣṇuśarman, स्थानलाभो *Daivajñavallabha* °दिनाशा: B, ऽरिनाश: Viṣṇuśarman *Daivajñavallabha* 14d वह्नि °*Daivajñavallabha* व्याधिनी चाव° Viṣṇuśarman °नीचापमाना: B *Daivajñavallabha* 15a लग्नं Viṣṇuśarman 15c स्थानेन Viṣṇuśarman 15c प्राप्नोति B पुष्टिं B 16b °जन्म° om. B, in marg. B[2] 16d धनक्षयाचैव सम्भवति M 17a सवि° M Viṣṇuśarman °पश्यता° Viṣṇuśarman 17b °जन्म° om. Viṣṇuśarman °लग्नस्थे B 17c-d ऽपि यदा यातु° Viṣṇuśarman यातुर्धनमानार्थगमा: M 17d °जयधनमानगा: क्षिप्रम् Viṣṇuśarman

केचिद्वदन्ति यस्मिन् ग्रहो निरंशं करोति तल्लग्नम् ।
भवनं यातुरनिष्टं भयशोकोद्वेगदं यस्मात् ॥ १८ ॥

वृषवृश्चिककर्कटैर्नृणामनुकूलैरपि लग्नमाश्रितैः ।
गमनं प्रवदन्त्यशोभनं मुनयोऽन्यर्क्षसमाश्रितैरपि ॥ १९ ॥

वेशिर्विलग्नोपगतो यियासोर्विनापि यत्नात् कुरुते फलाप्तिम् ।
नौयानमिष्टं जलराशिलग्ने तदंशके चान्यगृहोदयेऽपि ॥ २० ॥

इति बृहद्यात्रायां लग्नबलाध्यायोऽष्टमः ॥ ८ ॥

ऊर्ध्वा तिर्यग्वानता स्याच्च होरा मुक्ता कान्ता नागतार्का क्रमेण ।
इत्येताः स्युर्जीवशर्मोपदेशे ज्ञेयो राशिर्ब्रह्मषण्डस्य पक्षे ॥ १ ॥

ऊर्ध्वा स्याद्या षट्चराद्येषु होरा भूयो भूयो मण्डले कैश्चिदुक्ता ।
राशौ राशौ प्राग्विलग्नोपयातैः द्रेक्काणैस्तु प्राह होरां वसिष्ठः ॥ २ ॥

सर्वं प्रमाणं मुनिचोदितत्वात् किं त्वत्र योज्यं दलमेव होरा ।
यस्मिन् सहस्रांशुरवस्थितोऽर्धे तिर्यङ्मुखी सा गणयेत्ततोऽन्याः ॥ ३ ॥

Testimonia :

19 *Daivajñavallabha* 15, 28 20c-d cited by Viṣṇuśarman on *V M* 12, 15 and by Govinda on *MC* 11, 46

3-4=*Daivajñavallabhā* 15, 30-31 4 Cited by Viṣṇuśarman on *MV* 12, 14

Apparatus :

18c गमने B 20a पे. विं° M यासो B, यि in marg. B² 20c दिनराशि° Viṣṇuśarman 2od वान्य° M Govinda °गृहोदयेषु M Col. इति om. B इति महायात्रयां लग्ननिश्चयो नाम अष्टमोऽध्यायः M.

1a तिर्यक्कानता B, तिर्यग्वा न राशि ता M 1b मुक्तकान्ता M 1d °ब्रह्मगुप्तस्य M 2a ऊर्ध्वायाष्षट्चरष्टाद्येषु M 2b मण्डलैः M 2c-d° यातैस्तैः द्रेक्काणैः प्राह M 3a सर्वाः B °नोदितत्वात् *Daivajñavallabhā* 3b किं त्वत्र होराबलमेव योग्यं *Daivajñavallabhā* 3d ऽन्ये M

धत्ते वांछितकार्यमूर्ध्ववदना क्लेशाद्विना लग्नगा
क्लेशायासपरिक्षयांश्च कुरुते तिर्यङ्मुखी गच्छतः ।
सैन्यभ्रंशमधोमुखी प्रकुरुते कृच्छ्राद्गृहे चागमं
सर्वाः पुष्टफलप्रदाः स्वपतिना दृष्टा न पापग्रहैः ॥ ४ ॥

ग्रहदिवसफलं यदेव यातुस्तदखिलमेव करोति तस्य होरा ।
हिमसलिलसृजो विनाह कश्चिद्युवतिसमाश्रयरत्नदेति चान्द्री ॥ ५ ॥

द्रेक्काणाकारचेष्टागुणसदृशफलं योजयेद्वृद्धिहेतो-
र्द्रेक्काणे सौम्यरूपे कुसुमफलयुते रत्नभाण्डान्विते च ।
सौम्यैर्दृष्टे जयः स्यात् प्रहरणसहिते पापदृष्टे च भङ्गः
साग्नौ दाहोऽथ बन्धः सभुजगनिगले पाशयुक्ते च यातुः ॥ ६ ॥

नृपमूर्तिर्लग्नगते द्रेक्काणे मन्त्रिणो द्वितीये च ।
वैद्यपुरोहितसाम्वत्सरास्तृतीये परे भृत्याः ॥ ७ ॥

स्थानपराक्रमचिन्ता व्यापारपराक्रमौ चमूपबलम् ।
अभ्यवहार्यं शयनासने च तत्पंचसु क्रमशः ॥ ८ ॥

Testimonia

6 cited by Viṣṇuśarman on *VM* 12, 14 7-8b and 10-14 cited by Viṣṇuśarman on *VM* 12, 24 8-18 *Daivajñavallabha* 15, 12-21 and 23

Apparatus:

4a पापैर्विना M लग्नगैः M, लग्नभात् Viṣṇuśarman 4b °क्षयंच Viṣṇuśarman सन्यध्वंस° B सैन्यध्वंस Viṣṇuśarman 4d पुष्टिफल° B पृष्टफला M, पुष्पफल° Viṣṇuśarman °प्रदाः] यदा M 5d °युवति जनाश्रयणदेति चान्द्रिम् M 6b °भांडान्युते B, °भाण्डान्विते Viṣṇuśarman वा B 6c च] ऽत्र B 6d भङ्गः Viṣṇuśarman सभुजगनिगडे B, सनिगलभुजगे Viṣṇuśarman पापायुक्ते B पापयुक्ते Viṣṇuśarman 7a °गतो M Viṣṇuśarman 7b द्रेक्काणे om. M Viṣṇuśarman 7c वैद्यः पुरत° साम्वत्सर° Viṣṇuśarman 7d परे om. B 8b °पराक्रमे चमू 8b °पबलं to 9b °राजा om. Viṣṇuśarman परतो व्यवहार-नृपसैन्ये *Daivajñavallabha* 8c शनासने B

यानासनशय्यावाहनानि दशमेऽपरेऽन्नपानानि ।
वाहनयोधाः परतस्त्रयोदशे भवति युवराजा ॥ ९ ॥

ज्ञेयं बलं प्रयातुर्मन्त्रस्य विनिश्चयश्च तत्परतः ।
परतः पञ्चदशाद्ये द्रेक्काणचतुष्टये रिपवः ॥ १० ॥

एकोनविंशके सैनिकाम्बुशयने धनानि परतोऽर्थाः ।
परतोऽस्य दण्डनेता सैन्यस्योपद्रवः परतः ॥ ११ ॥

सेनाछिंद्रं तस्मात् सेनानेता भवेच्चतुर्विंशे ।
सैन्यारोग्यं सैन्यं चतुष्पदं च क्रमात् त्रितये ॥ १२ ॥

कार्यं कोशः फलसिद्धयस्त्रये भूमिपास्त्रये परतः ।
धर्मक्रियाथ योधार्चनं च यात्रासमाप्तिश्च ॥ १३ ॥

इत्युदयाद्या भावा द्रेक्काणैर्ये मया समुद्दिष्टाः ।
सदसत्फलमादेश्यं सदसद्युतवीक्षणात्तेषाम् ॥ १४ ॥

नवभागे तिग्मांशोर्वाहननाशो विलग्नसंप्राप्ते ।
कृच्छ्रात् स्वगृहागमनं प्रतापमृदुता च चन्द्रांशे ॥ १५ ॥

Testimonia

15-18 Cited by Viṣṇuśarman on *VM* 12, 14

Apparatus

9b °हनादीनि M परेण M, परतो *Daivajñavallabhā* ऽन्न° om. M 9d भवति] ऽपि *Daivajñavallabhā* युवराजः *Daivajñavallabhā* 10a बलं ज्ञेयं Viṣṇuśarman 10b °मैंत्रस्थ B, °यंज्ञस्य M निश्चयश्च *Daivajñavallabhā* 10-c परतः om. M, ज्ञेयाः Viṣṇuśarman 11a-b °विंशतितमे सैनिकशयने *Daivajñavallabhā* 11c ऽस्य]ऽन्न° M 11d दण्डस्यो° Viṣṇuśarman 12c सेनारोग्यं M Viṣṇuśarman *Daivajñavallabhā* 12d क्रमात्तच्च Viṣṇuśarman 13a त्रये कार्यं Viṣṇuśarman 13a-b फलसिद्धिश्च Viṣṇuśarman 13b भूभुज° *Daivajñavallabha* 13d च om. B 14b समुदिष्टाः B, विनिर्दिष्टाः M, दिष्टाः *Daivajñavallabhā* 14d सदसद्ग्रह M, सद्युसर्ति Viṣṇuśarman 15a नवमांशे *Daivajñavallabhā* 15c स्वसद्मागमन M

कौजेऽग्निभयं बौधे मित्रप्राप्तिर्धनागमो जैवे ।
भोगविवृद्धिः शौक्रे भृत्यविनाशो रविसुतांशे ॥ १६ ॥

यदुदयति फलं ग्रहे प्रदिष्टं जनयति तस्य नवांशको विलग्ने ।
शुभभवननवांशे सहायो रिपुबलभागमुपैति यातुरत्र ॥ १७ ॥

यत् प्रोक्तं राश्युदये द्वादशभागेऽपि तत् फलं वाच्यम् ।
यच्च नवांशकविहितं त्रिंशांशस्योदये तत् स्यात् ॥ १८ ॥

इति बृहद्यात्रायां लग्नभेदाध्यायो नवमः ॥ ९ ॥

सन्तापशोकगदविघ्नकृदुद्गमेऽर्कः कल्याणमानबलहार्दिहरो द्वितीये ।
हेमान्नविद्रुममणिक्षितिदस्तृतीये वैराग्यबन्धुकलहारतिदश्चतुर्थे ॥ १ ॥
पुत्रापदं सुतगृहेऽध्वनि चार्थसिद्धिं षष्ठेऽभिवांछितफलाप्तिमरिक्षयं च ।
द्यूने कलत्रकलहं धनसंक्षयं च मृत्युं करोति निधने सविता रुजं च ॥२॥
धर्मं हिनस्ति नवमे सवितार्थदश्च हत्वा वियत्यविदितं श्रमकर्मदाता ।
रत्नागमं सुबहु लाभगतः करोति कृत्वा व्ययं व्ययगतः कुरुतेऽर्थमल्पम् ॥३॥

16b मित्राप्तिस्सद्धनागमो M, मित्राप्तिधनागमा Viṣṇuśarman 17a गृहे B, ग्रहो° M, om. *Daivajñavallabhā* °प्रदिष्टं M 17b नवांशके M Viṣṇuśarman 17c सहायं Viṣṇuśarman *Daivajñavallabhā* 17d °भाग उपैति B *Daivajñavallabhā* यातुरर्थं M Viṣṇuśarman (,) यातुरर्थात् *Daivajña-vallabhā* after 17 *Daivajñavallabhā* adds:

शुभर्क्षे तन्नवांशे च याति मनुजेश्वरः । शत्रुबलान्नेता साहाय्यमुपगच्छति ॥

Col: इति om. B इति महायात्रायां द्रेक्काणविनिश्चयो नाम नवमोऽध्यायः M

Testimonia

1-19 Cited by Viṣṇuśarman on *VM* 12, 25

Apparatus

Verses 1-20 (with the exception of 6c; 8c; 10d; 11a; 11d; and 12c) om. M, which has: सन्तापइत्यादि जिगीषोरित्यन्तं प्रश्नमार्गोक्तमेव 1b कल्पार्थ° B °हार्द° Viṣṇuśarman द्वितीये om. Viṣṇuśarman 1c भौमान्न° Viṣṇuśarman 2a सुतगतो Viṣṇuśarman चार्थलाभः Viṣṇuśarman 2b °क्षयाय Viṣṇuśarman. 3b हित्वा B 3c तु बहु Viṣṇuśarman 3d व्ययं om. B ऽर्थमन्यम् Viṣṇuśarman

लग्ने शशी कलहशोककरो न पूर्णः स्त्रीवाजिरत्नसुहृदात्मजदः कुटुम्बे ।
दुश्चिक्यगो युवतिरत्नधनप्रदाता बन्ध्वाप्तिदः सुहृदि तत्क्षयदश्च कृष्णे ॥४॥

अर्थप्रदस्तनयगः सुतशोककृच्च मित्रारितां प्रकुरुते न सुखं च षष्ठे ।
अस्तेऽर्थभूयुवतिदोऽर्थविनाशदोऽणुश्चन्द्रोऽष्टमे निधनशोककरः प्रयातुः ॥ ५ ॥

प्रत्येति चाशु नवमे कुरुते च कार्यं क्षीणे क्षयो वियति वृद्धिरतोऽन्यथास्थे ।
ऐश्वर्यसौख्यधनलाभमुपैति लाभे क्लेशक्षयव्ययभयानि च रिष्फयाते ॥ ६ ॥

लग्ने विषाग्निरुधिरागमशस्त्रबाधा भिन्द्याद्बलं धनगतोऽर्थकरश्च पश्चात् ।
दुश्चिक्यगो युवतिरत्नधनाम्बराप्तिं बन्धुक्षयारिभयदो हिबुके महीजः ॥ ७ ॥

पुत्रापदं क्षितिसुतः कुरुते सुतस्थः शत्रुप्रणाशमचिरादरिगः करोति ।
अर्थक्षयारतिगदार्दनमस्तसंस्थो बन्धार्थहानिगदमृत्युभयानि मृत्यौ ॥ ८ ॥

धर्मं न साधयति धर्मगतो महीजः शस्तोऽम्बरे न शुभदः कथितोऽपरैश्च ।
लाभेऽर्थसिद्धिविभवागमदः प्रयातुर्वित्तक्षयं बहु करोति गतश्च रिष्फे ॥ ९ ॥

लग्ने कीर्तिसुखार्थबुद्धिविजयान् प्राप्नोति वित्तं धने
सोत्कण्ठं स विरागमेति सहजे कामान् लभेताखिलान् ।
पाताले शयनान्नपानविभवान् पुत्रागमं पञ्चमे
षष्ठे यात्यरिबाध्यतां शशिसुते क्लेशश्च यातुर्भवेत् ॥ १० ॥

Apparatus:

4a °शोकहरो Viṣṇuśarman 4b स्त्रीवर्जं° B 4c दुश्चित्कगो Viṣṇuśarman 4d बंध्या° B, वध्वा° Viṣṇuśarman 5a अर्थक्षयस्त्रयगतः Viṣṇuśarman °शोकृत्त्र B 5c-d ऽनुश्चन्द्रो B 6a गशु B, चा written above B[2], नाशु Viṣṇuśarman ऽतिकार्यं Viṣṇuśarman 6b क्षीणो व्ययं Viṣṇuśarman वृद्धिकरोऽन्यथास्थः Viṣṇuśarman 6d रिषं याते B 7b ऽर्थगतश्च Viṣṇuśarman 7c दुश्चित्कगो Viṣṇuśarman °धनाम्बप्राप्तिं B 8b °दभगः B 8c अर्थक्षयारतिग M °गदाधन° Viṣṇuśarman 8d बन्धार्थनाशभयमृत्युकरश्च Viṣṇuśarman 9b कंदतो B 9c लाभार्थ° Viṣṇuśarman 10a लगने तिसुखा° B °बुधि° B, °मित्र° Viṣṇuśarman 10b उत्कं श्चाथ सर्वराग° B, ठं written above B[2] कामिन् B कार्यं Viṣṇuśarman °खिलम् Viṣṇuśarman 10c पत्राले स्वाय° B 10d षष्ठे यात्यरिबाध्य M यात्वारिबाधितां B, तु and घ्य written above B[2]

जायास्थे प्रवराङ्गनाम्बरधनप्राप्तिर्बुधेऽर्काच्च्युते
केचित् क्लेशमुशन्ति नैधनगते शंसन्ति केचिच्छुभम् ।
धर्मे धर्मविवृद्धिरम्बरगते सिद्धिर्भवेदीप्सिता
विद्यार्थाप्तिरयत्नतश्च परतो रिष्फे च वाच्यो व्ययः ॥ ११ ॥

कीर्तिर्लग्नेऽथार्थसिद्धिर्द्वितीये दुश्चिक्यस्थे क्षुच्छ्रमार्तिः सुरेज्ये ।
पातालस्थे धर्मतत्त्वाभिमाना कार्यं सिध्यत्यात्मजस्थेऽप्यसाध्यम् ॥ १२ ॥

षष्ठे जीवे शत्रुरायाति वश्यं केचित् प्राहुर्वश्यतां याति शत्रोः ।
विन्दन्त्यस्तेऽरिष्टयोषायशांसि मृत्यौ प्राणान् हन्त्यथान्ये जगुर्न ॥ १३ ॥

पुत्रोत्पत्तिर्धर्मसिद्धिश्च धर्मे जीवे कर्मण्यर्थसिद्धिर्यशश्च ।
लाभे कार्यं वाञ्छितं याति सिद्धिः रिष्फे प्राप्ते क्लिश्यतेऽनेकदुःखैः ॥ १४ ॥

वेश्यार्थाम्बरमाल्यभोजनसुखप्राप्तिर्विलग्ने भृगौ
लाभोऽर्थे सहजे न सीदति गतः प्राप्नोति श्रेष्ठां श्रुतिम् ।
पाताले सुहृदागमः सुतगृहे स्थानार्थमानागमः
षष्ठे शत्रुपराभवारतिशुचं स्थानेऽन्यथा तज्जगुः ॥ १५ ॥

दत्त्वा स्त्रीधनमस्तगः स्वविषयव्युच्छित्तिदो भार्गवः
कार्यं साधयतेऽष्टमेऽथ नवमे क्षिप्रं करोतीप्सितम् ।
यातुः कर्मगतः प्रभूतधनदो लाभे जयार्थप्रदो
व्यर्थं द्वादशगो व्ययं प्रकुरुते शस्तोऽपरैर्द्वादशे ॥ १६ ॥

Apparatus

11a °बुधेऽर्कच्युते M ऽर्कात्सुते Viṣṇuśarman 11b लग्नमु° Viṣṇuśarman 11d °प्तिर्यत्नतश्च B रिपे च विद्या व्ययः M 12a ऽर्थस्य Viṣṇuśarman 12b दुश्चित्कस्थे Viṣṇuśarman षुश्रमार्तिः B, क्षन् written above B² सुरेड्ये Viṣṇu-śarman 12c सर्वदासत्तिकामा Viṣṇuśarman 12d सिध्यत्वा° B 13a त्रृद्धि Viṣṇuśarman 13b शत्रुः Viṣṇuśarman 13c विन्दन्तेऽस्ते Viṣṇuśarman ऋद्धयोषा° B, रिष्ट written above B², ऽरिस्वयोषा° Viṣṇuśarman व्यश्यासि B 14a °वृद्धिश्च Viṣṇuśarman 14c कार्यं] जीवे Viṣṇuśarman वाञ्छिता-याति Viṣṇuśarman 15a °वश्या° Viṣṇuśarman 15b गतः] चातः B चैषां श्रुतिः Viṣṇuśarman 15c °मानान् ययः B 15d °रतिम्पुच B छुन्येऽथातो जगुः B 16b च Viṣṇuśarman 16d द्वादशजन्मगोऽत्र कुरुते Viṣṇuśarman

बन्धं वधं चार्कसुते विलग्ने धनेऽर्थहानिं लभते शुभं च ।
शत्रोर्बलं हन्ति गतस्तृतीये चतुर्थगो बन्धुभयं परेभ्य: ॥ १७ ॥

नार्थस्य सिद्धि: सुतगेऽर्कपुत्रे रिपून् रिपुस्थे सृजयत्ययत्नात् ।
उत्साहभङ्गोऽक्षिरुजश्च दारे विषाग्निशस्त्रादिवधोऽष्टमस्थे ॥ १८ ॥

धर्मे न धर्मं लभते सुखञ्च यानावृतिं कर्मफलं च स्वस्थे ।
एकादशस्थे जयवित्तलाभान् मन्देऽन्त्यगे नार्थमुपैति याता ॥ १९ ॥

प्रायो जगु: सहजशत्रुदशायसंस्था:
पापा: शुभा: सवितृजं परिहृत्य खस्थम् ।
सर्वत्रगा: शुभफलं जनयन्ति सौम्या-
स्त्यक्त्वास्तसंस्थममरारिगुरुं जिगीषो: ॥ २० ॥

केचित् प्राहुररिव्ययास्तसहजस्थानानि हित्वा भृगु:
श्रेष्ठश्चन्द्रसुतोऽन्त्यधर्मसहजद्यूनस्थितो नेतर: ।
चन्द्रो लाभसुतार्थधर्मसहजव्योमस्थित: पूजितो
जीव: सर्वगतो मणित्थकथितो नेष्टोऽन्त्यषट्स्त्र्याश्रित: ॥ २१ ॥

एकीयपक्षेऽपि हि कैश्चिदुक्तो भृगु: शुभोऽन्त्यात्मजलाभवर्जम् ।
चन्द्रस्त्रिषष्ठायदशास्तसंस्थो बुधोऽस्तलग्नायसुहृद्व्ययस्थ: ॥ २२ ॥

इति बृहद्यात्रायां ग्रहस्थानबलाध्यायो दशम: ॥ १० ॥

Testimonia

20 Cited by Govinda on *MC* 11,56

Apparatus

17b लभते कुरुते धु गणतो B, च written above B[2] 17d बन्धवधं Viṣṇuśarman 18b रिपुं Viṣṇuśarman रिपौ संप्रजयत्य Viṣṇuśarman 18c ऽर्कसुते च कामे Viṣṇuśarman 18d °शस्त्रारिवधो Viṣṇuśarman 19b न निश्रुतिं B 19c °लाभो Viṣṇuśarman 19d नाशमु° Viṣṇuśarman 20b परिदु: खस्थम् B 20d जिगीषो: M, जिगीषु: B, यियासो: Govinda 21a °रिव्यास्त°B 21d मणिथिकंदतो B, मणिन्धकथितो M °षटत्रियाश्रित B, °षट्त्रिस्थित: M 22a °दुक्ते M, °दुक्तं B 22c चन्द्रस्तु M °दशत्रिसंस्थो M 22d बुधस्तु M col. इति om. B इति महायात्रायां ग्रहभावशुद्धि: दशमोऽध्याय: M

सौम्यासौम्येष्वेतल्लग्नादिस्थेषु यत् फलं प्रोक्तम् ।
तत्समकालगतानां फलवैषम्यादनेकान्तम् ॥ १ ॥

होराविदो जगुरिदं सुतावबलो दशाधिपारिश्च ।
अशुभफलदश्चासाम्प्रतमुदये सौम्योऽपि नेष्टफलः ॥ २ ॥

साम्प्रतं शुभदः सुतौ बलान्वितो यो दशाधि(प)मित्रं च ।
पापोऽपि शुभफलः स्याच्छ्लोकः शास्त्रोदितश्चात्र ॥ ३ ॥

सौम्योऽप्यतीवचिरभाविफलो न योज्यः
पापोऽप्यसाम्प्रतफलो रिपुनिर्जितश्च ।
पाकाधिपो ऽऽत्मसदनाष्टकवर्गशुद्धः
स्वल्पोऽफलश्च दिनभांशविधिस्तथा स्यात् ॥ ४ ॥

सौम्यं दशाधिपं लग्नसंस्थमिच्छन्ति केचिदाचार्याः ।
पापं चोपचयस्थं न विलग्ने तत्र च श्लोकौ ॥ ५ ॥

सौम्यग्रहेषु लग्नेषु शुभमेकान्तनिश्चितम् ।
पापग्रहोदये यातुरसंशयमशोभनम् ॥ ६ ॥

तस्मात् क्रूरं दशानाथं यातुर्वीर्यगुणान्वितम् ।
कुर्यादुपचयर्क्षेषु न विलग्ने कथंचन ॥ ७ ॥

तच्च विरुद्धं तेषां कथमन्यदशासु दास्यते स्वफलम् ।
एवं फलस्य नाशो व्रजति सर्वस्य फललि(ली)प्सोः ॥ ८ ॥

तस्मान्नैकान्तोऽयं जातकमवलोक्य निर्दिशेत् सदसत् ।
श्लोकौ वृत्तं भेदं प्राह मणित्थो वसिष्ठश्च ॥ ९ ॥

Apparatus

Id °नेकात्व M 2b °वब° om. M 2c-d °दस्त्विदानीमु° M 2d सौमे B 3a सांप्रतफलदः M 3b दशावतेर्बन्धुः M 3c पि स शुभदः B 4a °प्यतिक्षरिर° B, प्यतीव written above B[2], प्यतीतच्चिर° M °फलेन M 4c पाकाधिपा B M, पा written above का B[2] सुहृदनष्टक° B 4d स्वल्पोपलश्च M 5a दशाधिफललग्न° M 5d श्लोका: M 6a °ग्रहेऽष्टलग्ने M 6b °निश्चयं M 8b स फलं B 8c फलस्याने M 8d व्रजति हि सर्वत्र M फललिप्सोः B M 9c चैमौ M 9d मनिथो वसिष्ठश्च B, वसिष्ठो मणिसश्च M

रक्षका वर्धकाश्चैव ये स्युर्जन्मनि नायकाः ।
तान् पापानपि निःशङ्को यात्रालग्नेषु योजयेत् ॥ १० ॥

शुभाशुभफला योगा जातके येऽप्युदाहृताः ।
तान् सर्वानवलोक्यैव प्रयाणेष्वपि योजयेत् ॥ ११ ॥

होरागतः स्वभवने यदि सूर्यपुत्रो मेषोपगोऽवनिसुतः स्वगृहे शशाङ्कः ।
शुक्रस्तुलाधरगतो मिथुने बुधश्च सिंहे रविर्यदि च पार्थिवजन्म विद्यात् ॥ १२ ॥

जन्मसमये शशाङ्कोदयोपचयसंस्थिता ग्रहाः केचित् ।
ते सर्वे नानाख्या क्रूराः सौम्यैः समाश्चिन्त्याः ॥ १३ ॥

यो यस्य दशमगृहगः स तस्य वश्यस्तु भवति नियमेन ।
यश्चाथ पणफरस्थः स भवति रक्षोपगस्तद्वत् ॥ १४ ॥

उपचयगृहोपयाताः परस्परं कीर्तितास्तु तानसमाः ।
आदौ प्रकीर्णकाध्याये चोदिताः कारकाश्च ॥ १५ ॥

जन्मेश्वरलग्नपयोर्यः शत्रुर्लग्नगः स सौम्योऽपि ।
कुरुते देहविपत्तिं क्रूरोऽपि शुभं तयोर्मित्रम् ॥ १६ ॥

भवेन्न यः कारकतानसंज्ञः स्वजन्मलग्नाधिपयोः शुभोऽपि ।
करोति लग्नोपगतः स यातुर्भयं विनाशं च बहुप्रकारम् ॥ १७ ॥

Tetimonia

10 Cited by Viṣṇuśarman on *VM* 12, 31-37

Apparatus

10a रजका Viṣṇuśarman 10b यस्य जन्मनि याचकाः Viṣṇuśarman 10c पापान् पथि Viṣṇuśarman 11a योज्या M 11b तर्कें च उदाहृताः M 11c तान् यथायोग पुरुष B. 12d °र्यदि गोर्दवजन्म B in M the order of verses is: 12, 15, 13, 16-20, 14, 21 13a-b शशाङ्कदजेपि पचये B, शशाङ्कोदुपचय M 13b संस्था ग्रहाश्रये केचित् M 14a दशमसंस्थः M 14b वश्योपगश्च नियमेन M 14c मत्स्यात्पणपरसंस्थः M पताफरस्थ B, णा written above ता B² 14d °स्तस्य B 15a-b उपचयपरस्परस्थास्तानाख्याः स प्रकीर्त्यन्ते M 15d °योद्गदिताः M काख्याश्च B, का written above ख्या B² 16c देहविपत्तिं कुरुते M 16d शुभस्तयोर्जित्रम् M 17a कारकातानसंज्ञा B °संस्थः M 17d च om B

पापोऽपि लग्नोपगतो नराणां शुभप्रदः कारकतानसंज्ञः ।
तस्मात् प्रयत्नादिदमेव चिन्त्यं यियासतां कारकतानयातम् ॥ १८ ॥

एकोऽपि वक्रोपगतो नराणां शुभोऽशुभो वापि चतुष्टयस्थः ।
वर्गोऽपि वास्योदयगो विनाशं बहुप्रकारं कुरुतेऽध्वगानाम् ॥ १९ ॥

स्वसुतस्थाने सूर्यः स्त्रीजनरत्नप्रमोददो लग्ने ।
अवशेषस्थानगतो वधबन्धोद्वेगदः क्षिप्रम् ॥ २० ॥

उडुपतिरुदयं प्राप्तः सर्वस्थानोपगः प्रयातॄणाम् ।
कुरुते रिपुप्रवृद्धिं दीप्तिविनाशं विघातं च ॥ २१ ॥

स्थानेऽर्कसुतस्य कुजो लग्नस्थो रिपुविनाशजयदाता ।
शेषस्थानोपगतः क्षितिसुतो रत्नार्थनाशकरः ॥ २२ ॥

रविशशिभौमस्थानेष्वनर्थदो लग्नगः शशाङ्कसुतः ।
भृगुसुतगुरुमन्दानामभिषेकजयार्थदीप्तिकरः ॥ २३ ॥

जीवो भृगुचन्द्रमसोः स्थाने धनयोधनाशकः प्रोक्तः ।
तत्परिशेषस्थानेष्ववनिसुहृद्वित्तजयदाता ॥ २४ ॥

सौम्यस्थाने शुक्रो बलहानिकरोऽर्थदोऽरिहन्ता च ।
स्थाने परिशेषाणामनिलज्वरशत्रुकोपकरः ॥ २५ ॥

Testimonia :

19 Cited by Govinda on *MC* 11,38

Apparatus :

18b °संस्थः M 18d °याताः M 19a नृपाणां M 19d च मानं B verse 19 is numbered 18 ; 20 not numbered ; 21-30 numbered 19-28; 31 not numbered; 32-38 numbered 29-35 in B 20a स्वसुस्थाने सू M 20b स्त्रीजनरक्षप्रामोददो B, स्त्रीरत्नजयप्रमोददो M 20d बन्धुवयोद्वेगदः प्रोक्तम् M 21c-d कुरुते वित्रद्धिदीप्त्योर्विनाशमाज्ञाविधातं च M 22b ऽरिप्रणाशं° M 22c-d शेषस्थानोपगतो भृगुसुतगु (cf. 23c) शकरः M (क्षितिसुतोरत्नार्थना om.) 22d क्षितिसुत° B, जः written above ति B[2] 24a बुधचन्द्र° M 24b °नाशकृत् M 24d °सुहृदवित्जय° B, °सुहृद्वित्तधन° M 25b °हर्दिकरो B र्थदु B 25d °मग्निज्वर° M

अर्कस्थाने मन्दो लग्नस्थ: प्रीतिसौख्यलाभकर: ।
नेष्टोऽन्यस्थानस्थ: प्रतापबलमानहानिकर: ॥ २६ ॥

सवितृतनय: स्वस्थानस्थो धनाङ्गविनाशकृत्
तुहिमकिरण:स्त्रीरत्नाप्तिं नरेश्वरतां रवि: ।
अवनितनय: सैन्यक्षोभं प्रियश्रवणं बुध:
सुरगुरुस्थो भोगप्राप्तिं करोति जयं सित: ॥ २७ ॥

योऽस्तं यात्युदयं वा दक्षिणमार्गस्थित: सहस्रांशो: ।
कुरुते ग्रह: सलग्ने योधधनाङ्गक्षयं यातु: ॥ २८ ॥

तिग्मकरस्योत्तरतो दर्शनमायाति यो ग्रहोऽस्तं वा ।
मध्ये तु वा स लग्ने यातु: कुसुमाम्बराशनद: ॥ २९ ॥

नियतगतिद्युतिवर्णप्रमाणवैकृत्यमुच्यते विकृति: ।
विकृतिस्थो लग्नगतो न शुभ:शुभद: स्वभवनस्थ: ॥ ३० ॥

याम्ये तमो ज्ञ: श्रवणे रविस्तु जातो विशाखासु सितश्च पुष्ये ।
पौष्णाप्यभाग्योरगकृत्तिकासु मन्दारवागीशशिखीन्दुजन्मा ॥ ३१ ॥

त्रिविधोत्पाताभिहतं बलवद्ग्रहपीडितं च यस्यर्क्षम् ।
यात्रायां लग्नगत: स वर्जनीयोऽनुकूलोऽपि ॥ ३२ ॥

पाकेश्वराधिमित्रे तद्वर्गे वा विलग्नगे यातु: ।
स्वयमरिरुपैति वश्यं प्रणतशिरा: सार्वभौमोऽपि ॥ ३३ ॥

Apparatus :

26b प्रीति om. M 26c नेषो B 26d प्रताबलवानहार्दिहर: B 27b स्थिरत्नाप्तिं B नरे स्वतां रवि हि B 27c सेन्यक्षोद्र B, भा in marg. B[2], सैन्यामोदं M प्रियाश्रत्रणं B 27d सुरगुरुल...भोग°M 28c गृह: B 28d °धनगं क्षयं B, °धनां क्षयं M 29b ग्रहस्तं B 29c मधेन M 29d कुस्मांबराणंनद: B, कुंसुमाशनाम्बुद: M 30a नियति° B 30d शुभद: शुभावस्थ: B 31a तमोजतश्श्रवणे M 31b विसाखेषु B 31c पूषाप्य° M 32a °भिहितं M 32b °वीक्षितं M 32c यात्रां लग्नत: M 32d सर्वजनीयो M 33a-b °रादिमित्रे भवने तद्वद्विलग्नगे M 33c °रिरुगैति B 33d °शरा: B

पाकेश्वरारिलग्ने वर्गे वा तस्य भूपतिर्गच्छन् ।
विनिहतशूरनराश्वः शत्रोरायाति वश्यत्वम् ॥ ३४ ॥

मूर्त्यर्थयोधवाहनमन्त्र्यरिमार्गनैधनमनांसि ।
कर्मागमव्ययाश्चोदयादयः कीर्तिता भावाः ॥ ३५ ॥

यात्राफलं चतुर्थे जामित्रे शत्रवः प्रमादश्च ।
शुभपापग्रहयोगाच्छुभाशुभं निर्दिशेदेषाम् ॥ ३६ ॥

सत्याचार्यस्य मते विबलः शस्तः शशी प्रयाणेषु ।
दिग्वीर्योनः केवलमिन्दुः शस्त इति जगुरन्ये ॥ ३७ ॥

यदेव यस्योदयसंस्थितस्य फलं प्रयाणे सदसत् प्रदिष्टम् ।
तदेव तस्याखिलमह्नि यातुर्ग्रहस्य वर्गे च विलग्नसंस्थे ॥ ३८ ॥

इति बृहद्यात्रायामुत्सर्गापवादाध्याय एकादशः ॥ ११ ॥

व्यसनं प्राप्नो(ति) महद् व्यतिपाते निर्गतोऽथवा मृत्युम् ।
वैधृतिगमनेऽप्येवं त्र्यहस्पृशि समुपदिशन्त्येव ॥ १ ॥

नावमरात्रे यायाद्दोषस्तत्राधिमासके व्यसनम् ।
ऋत्वयनयुगस्याप्तौ न विजयकाङ्क्षी नृपः प्रवसेत् ॥ २ ॥

स्वर्क्षेशदशाधिपयोर्मित्रोदासीनशत्रुभांशभवाः ।
तत्पाकभुजश्चोक्ता विजिगीषोर्मित्रमध्यरिपव : ॥ ३ ॥

Apparatus:

34b वर्गे] भवने M 34c विहतश्रमो निराशः M 35a पूर्ण्यर्थ° M °वाह्यानि B 35c कर्मासचिवा° B 36d °शेत्तेषु M 37b ऽपि बलः M 38b प्रमाने B प्रविष्टं B Col. इति om. B

इति महायात्रायां अपवाद एकादशोऽध्यायः M

Chapter 12 omitted M 1a प्राप्तो B 1c त्येवं B 1d त्रिहस्पृशि B, त्र्य written above ह B² 3d °मध्यपाः है B, रा written above पा B²

रिक्तानिष्टदशोऽरिर्नियमाद्विजिगीषुणा समुच्छेद्यः ।
अवरोहिदशः पीड्यः कर्षयितव्यस्तथा रोही ॥ ४ ॥

न सदृशदशोऽभियोज्यः सन्धानं तेन भूपतेर्व्यासम् ।
अशुभैष्यासन्नदशः शुभैष्यपाकेन सन्दध्यात् ॥ ५ ॥

श्रेयान् विपर्यये विग्रहस्तथारोहिण्यशुभैष्यदशः ।
आसीत यदा शत्रुः शुभैष्यपाके विदूरस्थः ॥ ६ ॥

आरोहिशुभैष्यदशः पाकपतौ बल्युते च भूपालः ।
यायात्तद्विपरीतं द्वैधीभावं तु मिश्रदशः ॥ ७ ॥

रिक्तोपहतदशायां जन्मोदयनाथशत्रुपाके च ।
स्वदशेशकारकदशः संश्रयणीयो नराधिपतिः ॥ ८ ॥

उपचयकर्तुर्व्रजेद्दिशं बलवति कण्टकगे च दिक्पतौ ।
मनसापि न दिग्बलान्विते दिगधिपतौ च ललाटसंस्थिते ॥ ९ ॥

जन्मोदयपौ बलान्वितावुपचयकण्टकगौ शुभप्रदौ ।
क्रूरावपि नित्यमेव तौ सौम्यैरेव समावुदाहृतौ ॥ १० ॥

स्वदशाधिपजन्मलग्नपाः सन्ध्यार्कोपगता न शोभनाः ।
परिहृत्य सितार्कनन्दनौ मध्यास्तिग्मकराद्विनिःसृताः ॥ ११ ॥

Testimonia:

4-8 and 10 cited by Viṣṇuśarman on *VM* 12, 1 9a-b and 13 cited by Viṣṇuśarman on *VM* 12, 11 9c-d cited by Utpala on *YY* 5, 5 10a-b cited by Viṣṇuśarman on *VM* 12, 12

Apparatus:

4a-b रिक्तारिष्टदशानिर्णयमद्वि° Viṣṇuśarman 4d कर्षैत° B, यि written above त B², कर्शयित° Viṣṇuśarman 5b °न्यर्ग्यिम् Viṣṇuśarman 5c अशुभैश्वासन्न° B 5d शुभैश्वपाकेन B 6a विपर्ये B 6a-b ऽपि ग्रहैस्तथारोहिशुभैष्य-दश Viṣṇuśarman 6b °रोहिणि शुभैस्वदशः B 6c शत्रोः Viṣṇuśarman 6d ऽपि दूरस्थः Viṣṇuśarman 7b पाणिपतौ Viṣṇuśarman 7d मित्रदशा Viṣṇuśarman 8b °मोद° illegible B 8c स्वदशेशतरेकदशा Viṣṇuśarman 8d नरेन्द्रपतिः Viṣṇuśarman 10a बलहीनौ Viṣṇuśarman on *VM* 12, 12

परस्परं सौरिकुजौ रवीन्दू त्रिकोणगौ भार्गवलोहितौ च ।
फलं यदुक्तं तदशेषमेव विनाश्य पश्चात् स्वदिशं नयन्ताम् ॥ १२ ॥

रिपुदिवसो यस्य भवेत् सौम्योऽपि स लग्नगो न शुभदाता ।
पापोऽपीष्टं जनयति मित्रं स्वदिने विलग्नस्थः ॥ १३ ॥

बलिनः कण्टकसंस्था वर्षाधिपमासदिवसहोरेशाः ।
द्विगुणशुभाशुभफलदा परतः परतो ग्रहा यातुः ॥ १४ ॥

यात्राजसिंहतुरगोपगते वरिष्ठा मध्या शनैश्चरबुधोशनसां गृहेषु ।
भानौ कुलीरझषवृश्चिकगेऽतिदीर्घा शस्तास्तु देवलमतेऽध्वनि पृष्ठतोऽर्कः॥१५॥

सकलफलददशाढ्यके प्रवरा मध्याष्टवर्गसंशुद्धौ ।
न्यूनफला तात्कालिकविलग्नतिथिदिवसकरणाद्यैः ॥ १६ ॥

उत्तमफला यात्रा त्रिकोणतुङ्गोपच(ये)षु सौम्येषु ।
मध्या स्वमित्रभवनोपगेषु नीचारिभेष्वधमा ॥ १७ ॥

मध्याधमाधमोत्तमसममध्याधोधमोत्तमोत्कृष्टा ।
मध्योत्तमा च षष्ठा यात्रा यात्राविदामिष्टा ॥ १८ ॥

Testimonia :

12 cited by Govinda on *MC* 11, 7 15 cited by Utpala on *BS* 103,60 and by Govinda on *MC* 11, 8 15a-c cited by Viṣṇuśarman on *VM* 12, 14 18 cited by Viṣṇuśarman on *VM* 12, 12

Apparatus :

12a शुभकुजौ B 12b वा Govinda 12d पश्चाच्वदिशं नयतां B, प्रश्चान्नयति स्वकाष्ठाम् Govinda 13b ऽपि विलग्नगो Viṣṇuśarman शुभदानम् Viṣṇuśarman 15a शरगोपगता Utpala, Viṣṇuśarman 15b °सग्रहेषु B, °सां ग्रहेषु Govinda 15c कुलीरवृषवृश्चिकगे Govinda कुलीरशशिवृश्चिकगे Utpala ऽतिहीना Viṣṇuśarman 15d शस्ता Utpala ऽर्के Utpala 16a सरांगलददशाढ्याके B, कल written above रांग and दोषा above दशा B² 17b °तुंगोपवेशु B 18a-b मध्यमाधमोत्तमसममध्याधमोत्कृष्टा Viṣṇuśarman 18c षोडा B, ढा written above डा B² 18d °वतामिष्टा Viṣṇuśarman

दिग्वर्गविलोमगे हते सन्ध्यार्कोपगते विदीधितौ ।
शुक्रे प्रवसन्नरेर्वशं याति बुधे च विलोमसंस्थिते ॥ १९ ॥

अनुलो(म)गते शशाङ्कजे शुक्रे चैवमपि व्यवस्थिते ।
यायादविशङ्कितोऽपरैः कथितोऽप्याङ्गिरसो यथेन्दुजः ॥ २० ॥

आक्रन्दसारी दिनमध्यगोऽर्कः पौरः पुरस्तादपरत्र यायी ।
आक्रन्द इन्दुर्गुरुमन्दसौम्याः पौराः स्मृता यायिन इत्यतोऽन्ये ॥ २१ ॥

यायिग्रहैर्वीर्यजयोपपन्नैः केऽरिप्रयाणं प्रवदन्ति धन्यम् ।
सत्यं तथा किं तु विशेषमाहुस्ते भूपतेः सत्फलदा जिगीषोः ॥ २२ ॥

दृष्टे साम्नां कर्मनिष्टं सुरारौ वैतालीयं पाददम्भौ च हित्वा ।
शस्तो राहुस्त्र्यायकर्मोपयातो यातव्यश्चासन्नतागश्च केतुः ॥ २३ ॥

साम्नां शुक्रबृहस्पती दिनकरो वक्रश्च दण्डेश्वरौ
भेदस्येन्दुजराहुकेतुरविजा दानस्य नक्तंचरः ।
अर्कादाटविकं यमा(द्) भृतबलं(स्यु)र्भार्गव(ाच्छ्रेणिकं)
ज्ञान्मन्त्रं रिपुदेशमौलबलपालक(ाभौमे)न्दुवागीश्वराः ॥ २४ ॥

यतोऽप(प)न्नदिवसकरोडुनाथयोस्ततो व्रजेद्रिपुनिधनाय पार्थिव ।
अथायनेन युगपदेकसंस्थयोर्द्युनक्तयो रविशशिनोर्व्रजेत्तदा ॥ २५ ॥

(इति) बृहद्यात्रायां मिश्रकाध्यायो द्वादशः ॥ १२ ॥

Testimonia :

19 cited by Viṣṇuśarman on *VM* 12, 5   21 cited by Utpala on *YY* 1, 14

Apparatus :

19c-d प्रवसन्नश B   19d याति बुधे च] सौम्ये वापि Viṣṇuśarman   20c पयादावि° B   21d ऽन्यः B   22a यापिगृहिर्विर्य° B   22d ज्ययदिषु B   23a सम्नाहं B   23c सास्तो B   °स्तियाक्रमो° B   24b रक्तंचरः B   24c भृजबलं भार्गव B   24d ज्ञानैर्मत्तं B, न written above नै B[2] °पालकेंदुपागीश्वराः B

दक्षिणपार्श्वस्पन्दनमभिधास्ये तत्फलक्षयो वामे ।
पृथिवीलाभः शिरसि स्थानविवृद्धिर्ललाटे स्यात् ॥ १ ॥

भ्रूनासिकान्तरे प्रियसमागमो भृत्यलब्धिरक्षिणोस्तु ।
दृक्पर्यन्तेऽर्थाप्तिः पूर्वे ज्ञेयात्र चोत्कण्ठा ॥ २ ॥

योषित्सौख्यं गण्डे दृक्चरमाघश्च सङ्गरे विजयः ।
श्रवणे च हितश्रवणं नासायां प्रीतिसौख्यं च ॥ ३ ॥

अधरोत्तरौष्ठयोः प्रियसमागमविजयौ गले च भोगाप्तिः ।
अंसे भोगविवृद्धिर्बाह्वाविष्टेन संयोगः ॥ ४ ॥

हस्तेऽर्थाप्तिः पृष्ठे पराजयो वक्षसि स्मृतो विजयः ।
प्रीत्युत्पत्तिः पार्श्वे स्तने त्वपूर्वा विषयलब्धिः ॥ ५ ॥

कट्यां बलप्रमोदः स्थानभ्रंशः प्रकीर्तितो नाभौ ।
हस्ते कोशविवृद्धिः क्लेशो हृदये ऽर्थपर्यन्तः ॥ ६ ॥

वाहनलाभः स्फिग्यायुर्वृषणे योषिदागमः शिश्ने ।
मुष्के तनयोत्पत्तिर्वस्तावन्तःपुराभ्युदयः ॥ ७ ॥

पृष्ठत ऊर्वोर्दोषः पुरतश्चलने तु शचिवहितलब्धिः ।
प्रचलति च जानुसन्धावरिसन्धानं बलवदुक्तम् ॥ ८ ॥

देशैकदेशनाशो जंघायां स्थानलब्धिरंघ्र्युपरि ।
अध्वागमनमलाभं चरणतले स्पन्दमाने तु ॥ ९ ॥

व्रणपिटकतिलकलांछनमशकादयस्त्वेव निर्दिष्टाः(स्युः) ।
कण्डूयनं नरपतेर्दक्षिणपाणौ जयायैति ॥ १० ॥

(इति) बृहद्यात्रायां देहस्पन्दनाध्यायस्त्रयोदशः ॥ १३ ॥

Apparatus :

2a भ्रूनासि° M 2b वृत्य° M °क्षिणसोः B, °क्षणसोः M 3a योषित-सम्बकइंडे B 3b दृक्सीमायश्च M 3d प्रीतिसामुख्यम् M 5d त्वपूर्वे B 6b स्थाभ्रंसः B 6c हृंते B, आन्ते M 7a-b स्फिग्धायुर्वेपने B, स्फित्यायुर्वेवने M 7b °दागविरामे B 8a ऊरोर्दो: M 8b °श्चलग्नेन M सचिवलब्धिश्च M 8c प्रच° om. M च om. B 8c-d जान्वोस्सम्यत्सन्धा परिसन्धानं M 9a अध्यगमनं सलाभे B, अध्वागमः सलाभे M 10b °मशक° om. M Col. om. M

पृष्टव्यो दैवविदा विश्रब्धमुपह्वरे नराधिपतिः ।
रिपुनिधनप्रणिधानं प्रति भवतः किं मनः कुरुते ॥ १ ॥

ब्रूयात्स चेन्मम मनः प्रोत्सहते हर्षयेत्ततश्चैवम् ।
चित्तानुकूलता सिद्धिलक्षणं तत्र च श्लोकाः ॥ २ ॥

शुभाशुभानि सर्वाणि निमित्तानि स्युरेकतः ।
एकतश्च मनश्शुद्धिस्तद्धि शुद्धं जयावहम् ॥ ३ ॥

कियच्चिरं न लभ्येत निमित्तं गमनानुगम् ।
न त्वेव तु मनोऽनर्थं चिरेणाप्यनुमन्यते ॥ ४ ॥

निमित्तानुचरं सूक्ष्मं देहेन्द्रियमहत्तरम् ।
तेजो ह्येतच्छरीरस्थं त्रिकालफलदं नृणाम् ॥ ५ ॥

प्रीयते न मनोऽनर्थैर्नासिद्धावभिनन्दति ।
तस्मात्सर्वात्मना यातुरनुमेयं सदा मनः ॥ ६ ॥

(इति) बृहद्यात्रायां चित्तशुद्धिर्नामाध्यायश्चतुर्दशः ॥ १४ ॥

यात्रावर्षिकसप्ताहाद्गुह्यकसाहायकं त्र्यहं पूर्वम् ।
त्र्यहमथ विजयस्नानं गृहयज्ञं सप्तमे दिवसे ॥ १ ॥

पक्वाममांसदधिफलकुसुमासवपायसप्रतिसरोभिः ।
मूलकभक्षैर्गन्धैर्गुग्गुलमुख्यैस्तथा धूपैः ॥ २ ॥

Testimonia :

3= *TY* 9, 6

Apparatus :

1b °मुपड्वरे B, °मुपस्वरे M 3c एकतस्तु B सनः शुद्धि° B, मनो यातु° M, मनो याति *TY* 4a क्यच्चिरं B, कश्चि in marg. B², कियच्चिन्तं M लमेतB, लभते M 4c स्त्वेवं B 4d °प्यनुगम्यते M 5a सुखमं B 5b °मनुत्तमम् M 5c ततो हेतशरीरस्थं B 5d °फलविनृणां B 6d सदा] यथा M Col. om. M

1a प्राक् M 1b °सह्राय्यमुच्यते/M 1c °स्नानात् M 1d वृद्दयज्ञं B, त्र्य in marg. B² 2c °भक्ष्यै° B 2d °गुंगुला° B, °गुंहुल° M

सांवत्सरसचिवपुरोहिताप्तपुरुषायुधीयपरिचारः ।
यायान्नगरचतुष्पथमभुक्तवस्त्रोत्तरीयाङ्गः ॥ ३ ॥

अर्धनिशायामुदयति सौम्ये वक्रेऽथवा तदंशे वा ।
दद्याद्बलिं दशस्वप्याशासु पुरोहितः क्रमशः ॥ ४ ॥

आवर्तयेत् पुरोधाः कृताञ्जलिस्तत्र रुद्रसावित्रीम् ।
कूष्माण्डमहारौहिणकुबेरहृदयान्यतः प्रपठेत् ॥ ५ ॥

द्वारत्रिकचतुष्काद्रिपुरनिष्कुटवासिनः ।
महापथनदीतीरगुहागाह्वरवासिनः ॥ ६ ॥

विश्वरूपा महासत्त्वा महात्मनो महाव्रताः ।
प्रथमाः प्रतिगृह्णीध्वमुपहारं नमोऽस्तु वः ॥ ७ ॥

सुपुत्रामात्यभृत्योऽयं सदारश्चैव पार्थिवः ।
रक्षणीयो हिते चास्य प्रयतध्वं समाहिताः ॥ ८ ॥

एवमुक्त्वा ततस्त्वर्घ्यं प्रमथेभ्यः प्रदापयेत् ।
सावित्र्याः स्थण्डिले तस्मिन् सूतस्तूपहरेद्बलिम् ॥ ९ ॥

यमेन्द्रवरुणार्थेशविष्णुपावकशूलिनाम् ।
यक्षरक्षःपिशाचानामसुराणां तथैव च ॥ १० ॥

ये स्युर्भूतगणास्तेभ्यो नमोऽस्त्वित्यनुयान्तु च ।
सन्नद्धाः स्वैः प्रहरणैररिसेनावधा इनाः ॥ ११ ॥

Apparatus :

3c-d °चक्षुश्वथभुक्त° B, ष्प written above श्व B[2] 4c दद्यदवलिं B 4c-d दशस्यप्या° B, दशस्वह्या° M 5c-d कूक्ष्माण्डीमहारौहिणी° M 5d °हृद-यादिसंशयतः प्रथमात् M 6a पंचत्रिच° M 6a-b °ष्कादपुरि° B, °ष्कोदुपुर° M 6d °गुह्यगमनवासिनः M 7a-b विश्वरूपा महारूपा महासत्त्वा महाव्रताः M 7c प्रतिगुरुंनिध्य° B 8a संभृत्या° M 8c हितस्यास्य M 8d सभाहिताः B 9d तस्तूप° B 11a येषु भूत° B, येस्युर्भीत° M 11b °नुयातु नः B 11c प्रकरणै° M 11d °वधायनः M

चमूसमेता अनुयान्तु पृष्ठतो विचित्रमाल्याभरणा मदोत्कटाः ।
विचित्रवस्त्रा जटिलाः किरीटिनः कराललम्बोदरकुब्जवामनाः ॥ १२ ॥

निवृत्तयात्रः पुनरप्यहं हि वो विजित्य शत्रून् भवतां प्रसादतः ।
अतो विशिष्टं बहुवित्तमुत्तमं बलिं करिष्ये विधिनोपपादितम् ॥ १३ ॥

अनर्चिता ये नृपतिं सवाहनं विनाशयन्ति क्षपयन्ति वा चमून् ।
सुपूजिताः सिद्धिकरा भवन्ति ते प्रबाधकाः शत्रुगणस्य चाहवे ॥ १४ ॥

क्षणषष्ठिभागमात्रं प्रयतो नृपतिर्विसर्जयेत् प्रमथान् ।
दैवज्ञपुरोधोभ्यामावेदितमङ्गलो यायात् ॥ १५ ॥

इति बृहद्यात्रायां गुह्यकानुष्ठानोऽध्यायः पंचदशः ॥ १५ ॥

दुकूलमुक्तामणिभृन्नरेन्द्रः समन्वितदैवज्ञपुरोहितोऽतः ।
स्वदेवतागारमनुप्रविश्य निवेदयेत्तत्र दिगीश्वरार्चान् ॥ १ ॥

अभ्यर्च्य मन्त्रैस्तु पुरोहितस्तानधश्च तस्यां भुवि संस्कृतायाम् ।
दर्भैस्तु कृत्वा स्तरमक्षतैश्च किरेत् समन्तात् सितसर्षपैश्च ॥ २ ॥

ब्राह्मीं सदूर्वामथ नागपुष्पीं कृत्वोपधानं शिरसि क्षितीशः ।
पूर्णान् घटान् पुष्पफलाभिधानानाशासु कुर्याच्चतुरः क्रमेण ॥ ३ ॥

Testimonia :

1-7 cited by Utpala on *BS* 47, 22

Apparatus :

12a चमूपसेनामनु° M 12c वीरागवस्त्रा M 12c-d क्रीटि...ना करालचोद्र-कुब्ज° B 13a नित्रत्य°B पुनरस्य ह हि B 13c विचित्रं B 14a अनर्चितास्ते B 15b प्रणतो M प्रथमान् M 15c नैमित्तिकपुरोहताभ्या° M Col. इति Om. B गुह्निका° B इति महायात्रायां गुह्यकानुष्ठानविधिः चतुर्दशोऽध्यायः M

Chapter 16 om. B 1d निवेशये° Utpala 2a मन्त्रैस्सपु° M 2c दर्भैश्च Utpala 2c-d °तैस्तां लिखेत् Utpala 3c पूर्वार्घजान् Utpala 3d दद्या° Utpala

यज्जाग्रतो दूरमुपैति दैवमावर्त्य मन्त्रान् क्रमशस्त्रिरेतान् ।
लब्ध्वेकभुग् दक्षिणपार्श्वशायी स्वप्नं परीक्षेत यथोपदेशम् ॥ ४ ॥

नमः शम्भो त्रिनेत्राय रुद्राय परमात्मने ।
वामनाय विरूपाय स्वप्नाधिपतये नमः ॥ ५ ॥

भगवन् देव देवेश शूलभृद्वृषवाहन ।
इष्टानिष्टे ममाचक्ष्व स्वप्ने सुप्तस्य शाश्वतम् ॥ ६ ॥

एकवस्त्रः कुशास्तीर्णः सुप्तः प्रयतमानसः ।
निशान्ते पश्यति स्वप्नं शुभं वा यदि वाशुभम् ॥ ७ ॥

गतैष्यजात्यन्तरसत्त्वसङ्गैः स्वप्नेऽप्यनूके गतिजे च नित्यम् ।
यातुः प्रकोपादनिलात्मकस्य नगाद्रितुङ्गाम्बरलङ्घनानि ॥ ८ ॥

Testimonia:

5, 6, 4, and 7-32 cited by Viṣṇuśarman on *VM* 12, 15

Apparatus :

4a °मुपैतु Viṣṇuśarman, °मुदेति Utpala 4b °मात्रत्य M मन्त्रं Utpala प्रयत° Utpala Viṣṇuśarman °त्रिरेतम् Utpala 4d स्वप्नान् निरीक्षेत Viṣṇuśarman 5b वरदाय च Utpala, वरुणाय च Viṣṇuśarman 6b शूलिन् वृषभवाहन Viṣṇuśarman 6c इष्टानिष्टं समाचक्ष्व Utpala 6d स्वप्नस्य Utpala, सन्यस्य Viṣṇuśarman after 6 Utpala adds:

इष्टमन्त्रान् ततः स्मृत्वा शिवशक्तिपुरोगमान् ।
अभ्यर्थनं ततस्तस्य कृत्वा सुप्रयतो नृपः ॥ १ ॥

7a °वस्त्रं कुशास्तीर्णं B, °वस्त्रे कुशास्तीर्णे Utpala 7b सुप्तं B, स्वप्ने Viṣṇuśarman °मानसम् B after 7 Viṣṇuśarman adds:

आद्ये वर्षात् वत्सरार्धात् द्वितीये यामे पाको वर्षपादात् तृतीये ।
मासात् पाकः शर्वरीपश्चिमांशे सद्यः पाको गोविसर्गे च दृष्टे ॥

before 8 Viṣṇuśarman inserts:

धातुप्रकोपग्रहपाकचिन्ता दृष्टाभिचारोद्भवगुह्यकोत्थाः ।

8a °सत्यसङ्ग° Viṣṇuśarman 8b ह्यनूके गतिजश्च चिन्त्यं Viṣṇuśarman 8c धातु° Viṣṇuśarman °कः स्यात् Viṣṇuśarman 8d तर्वादितु° M, नागाद्रितु° Viṣṇuśarman

पित्ताधिके काञ्चनरत्नमाल्यदिवाकराग्निप्रभृतीनि पश्येत् ।
श्लेष्माधिकश्चेन्दुभशुभ्रपुष्पसरित्सरोम्भोधिविलङ्घनानि ॥ ९ ॥

जघन्यमध्यप्रथमे निशांशे प्रावृच्छरन्माधवसंज्ञते च ।
काले मरुत्पित्तकफप्रकोपात् साधारणः स्यात् फलसन्निपातः ॥ १० ॥

दशासु चोक्तं ग्रहपाकजातं चिन्ता तु दृषा तु यथा तथैव ।
बीभत्ससत्त्वाभिभवोऽभिचारो विघ्नोद्भवो गुह्यकजः प्रदिष्टः ॥ ११ ॥

अनूकचिन्ताग्रहदोषदृष्टान्यतीतकर्माणि च निष्फलानि ।
द्युदृष्टपूर्वाः कथिताश्च तद्वदन्यत्र लोके कथिता विशेषाः ॥ १२ ॥

प्रत्यक्षवद्भवति यः स्फुरतीव चान्तः
स्वप्नस्य तस्य नियमात् सदसत्फलाप्तिः ।
स्वप्नाः शुभाशुभकृताः फलदा नराणा-
मुद्देशमात्रमिहताननुवर्णयामि ॥ १३ ॥

स्वाङ्गप्रज्वलनं परोपगमनं शक्रध्वजालिङ्गनं
दिक्संवृत्तनरेन्द्रकन्यकतनोर्विक्षेपणं दिक्षु च ।
बन्धो वा निगले ग्रसेच्च दहनं नानाशिरोबाहुता
छत्रं वा द्विरदोऽभिषिच्य बिभृयाद्दिव्योऽथवा ब्राह्मणः ॥ १४ ॥

Apparatus

9a वित्तेऽधिके M °रक्त° M 9c °शंखशुक्ति° Viṣṇuśarman 10b प्रावृट्शर° Viṣṇuśarman, प्राविच्चरं M 10c °कोपे Viṣṇuśarman 10d °णे स्यात्खलु सन्निपाते M, °णं स्यात्फलसन्निपातः Viṣṇuśarman 11a जातं फल° Viṣṇuśarman 11b च दृष्टा च Viṣṇuśarman 11d विश्वोद्भवो M गुह्यरुजः Viṣṇuśarman 12a °गतिदोषतृष्णा° Viṣṇuśarman 12b °न्यभीक्ष° M 12c °दीर्घाः Viṣṇuśarman 12d °दनित्यपाका गदिताश्च शेषाः Viṣṇuśarman 14a छत्रध्वजा° Viṣṇuśarman 14b °नरैन्द्रकन्यचतनोर्विक्षे° M, °नरैर्निकृत्तपतनाः प्रक्षे° Viṣṇuśarman 14c ग्रसेत Viṣṇuśarman 14d उत्रं वा M, स्रच्छत्रं Viṣṇuśarman द्विरदे M भिषच्य M

उडुपदिनकृद्रोशृङ्गाग्रसुताम्ब्वभिषेचनं
यदि च महिषीसिंहीव्याघ्रीगवां सुखदोहनः ।
जठरनिसृतैश्चान्त्रैर्ग्रामद्रुमादिनिवेष्टनं
विशति यदि वा सुश्लिष्टाङ्गी तनुं प्रवराङ्गना ॥ १५ ॥

मनुजहृदयमूर्ध्नां भक्षणं वा स्वदेह-
भुजगतुरगसिंहेभाजमांसादनानि ।
तृणतरुकुसुमाम्भःप्रोद्गमो वा स्वनाभौ
क्षितितनुपरिवर्तोन्मूलने वाधिराज्यम् ॥ १६ ॥

दिनकरशशितारा भक्षणस्पर्शणानि
दरणमपि च मूर्ध्नः सप्त पञ्च त्रिधा वा ।
वृषभगृहनगेन्द्राश्वेभसिंहाधिरोहो
ग्रसनमुदधिभूम्योश्चाधिराज्यप्रदानि ॥ १७ ॥

विपुलरणविमर्दद्यूतवादैश्च जित्वा
पशुमृगमनुजानां लब्धिरभ्यासनं वा ।
विडशनपरिलेपोऽगम्यनारीगमो वा
स्वमरणशिखिलाभः सस्यसन्दर्शनं च ॥ १८ ॥

सितसुरभिमनोज्ञालेपमाल्याम्बराणां
द्विजसुरगुरुराज्ञां दर्शनान्याशिषं च ।

Apparatus :

15a °दिनपगोश्रृङ्गस्नातानंघभि° Viṣṇuśarman 15b भवति यदि वा व्याघ्री-सिंहीगवां सुखदोहनं Viṣṇuśarman 15c °सृतैरान्त्रै° Viṣṇuśarman °द्रुमा-द्यभिषेचनं Viṣṇuśarman 15d वा om. Viṣṇuśarman 16a °सास्वदानस्वहृत भुजगसिंहे° Viṣṇuśarman 16c °माम्बुप्रोद्भवो Viṣṇuśarman 16d क्षितिररिपरि° Viṣṇuśarman चाधि° Viṣṇuśarman 17b दलन° Viṣṇuśarman 17c °नरेण-श्वेभ° M 17d °धिनेम्योश्चा° Viṣṇuśarman 18b पशुमनुजमृगाणां Viṣṇuśarman °रध्यापनं Viṣṇuśarman 18c विशसनपरिलोपो Viṣṇuśarman 18d स्वशरण° Viṣṇuśarman 19a सितकुसुममनोज्ञा Viṣṇuśarman °लेपलाल्य° M °म्बरस्त्री Viṣṇuśarman 19b °गुरुसुर° Viṣṇuśarman दर्शनं चाशिषश्च Viṣṇuśarman

मणिरजतसुवर्णाम्भोजपात्रेषु भुङ्क्ते
यदि दधिपरमान्नं शोणिते मज्जने वा ॥ १९ ॥

सिततुरगरथध्वजातपत्रव्यजनसरोजमणिद्विपेन्द्रलाभाः ।
अभय जय च भुंक्ष्व चेति शब्दाः परिणतराज्यफलप्रदाः प्रदिष्टाः ॥२०॥

पूर्वजन्मसु चाभ्यस्ता सत्त्वरूपा गतिस्तदा ।
(तद)नूकमिति प्रोक्तमिह पश्चात् करोति यत् ॥ २१ ॥

मुद्रादिषु यज्ञनीविषु स्त्रीसंज्ञादिषु चाङ्गनाप्तिरुक्ता ।
लब्धे शयनेऽथ दर्पणे भृङ्गारादिषु चोद्भवः(सुत)स्य ॥ २२ ॥

कामिन्यां धनलब्धिरम्बुतरणे शोकस्य नाशो भवे-
द्धर्षो रोदितशोचितादिषु तथा दाहे विवृद्धिर्मता ।
गोश्रृङ्गिद्विजदेवतापितृसुहृद्भूपाश्च शंसन्ति यत्
स्वप्ने तन्नियमाद्भवत्यवितथं नेष्टं शुभं वा फलम् ॥ २३ ॥

नाभेरन्यत्र गात्रे तृणतरुकुसुमप्रोद्भवः स्नेहपानं
क्रीडायानोपभोगः खरकपिकरभव्यालरूपैश्च सत्त्वैः ।
कायस्यालेपनं वा कलुषमलमषीगोमयस्नेहपङ्कै-
र्दृग्जिह्वादन्तबाहुप्रपतनमथवानर्थशोकप्रदानि ॥ २४ ॥

Apparatus

19c °पत्रेषु Viṣnuśarman 19d मज्जतेऽसृग्घटे Viṣṇuśarman 20a °गफलध्व° Viṣṇuśarman 20c भुंक्ष्य Viṣṇuśarman 20d परिमित° M. 21-22b om. Viṣṇuśarman 21a-b चाभ्यस्तं सत्वरूपं M 22a मुद्राषदा यजननीविप्रस्त्री° M 22c सरके M च Viṣṇuśarman 22c-d भृङ्गादिषु M 22d चोभवस्य M चाङ्गाप्तिरुक्ता Viṣṇuśarman (22b) 23a त्रैमिण्ये M °म्बुकरणे M 23b सिंहीदोहनरोदनादिषु Viṣṇuśarman °शोदिता° M ऽपि बृद्धिः स्मृता Viṣṇuśarman 23c गोलिङ्ग° Viṣṇuśarman °पितृवधूबालाश्च Viṣṇuśarman शं om. M 23d °यमान् M °तथन्नेषं M, ° तथं कष्टं Viṣṇuśarman तद्भवेत् Viṣṇuśarman 24a गात्रे M, देशे Viṣṇuśarman 24b °भोगाः Viṣṇuśarman° °करभकपि° Viṣṇuśarman 24c °जलमषीकज्जल° Viṣṇuśarman 24d °दन्तपङ्क्तिप्रपतनमपि वानर्थशोक° Viṣṇuśarman °र्थ° om. M

गीतोत्क्रीडितभूषितप्रहसितप्र(मोदिता) खेलिता-
न्यर्केन्दुध्वजतारकानिपतनं स्त्रोतोवहाया गमः ।
रज्जुच्छेदचिताप्रपातजननीगात्रप्रवेशस्तथा
स्वप्ने कांस्यविचूर्णनं च शिरसः क्लेशामयानर्थदाः ॥ २५ ॥

श्मश्रुकेशनखदैर्घ्यकल्पना वानरीविकृतनार्युपासनम् ।
रक्तवस्त्रमनुजाङ्गमर्दनं रोगमृत्युभयशोकतापदम् ॥ २६ ॥

स्थलमृगपशुकीटानूपवर्यन्धजानां
प्लवनमुदकराशौ स्याद्विवाहोत्सवो वा ।
सरसिजजतुभाण्डक्रीडनं नर्तनं वा
मलिनविवसनत्वं चाशु रोगप्रदानि ॥ २७ ॥

स्वद्रव्यनाशः सुहृदां वियोगश्छेदश्च पाण्योः कमलापहारः ।
प्रासादवेश्माद्रिशिरोवताराः स्वप्नेषु नेष्टा इति संप्रदिष्टाः ॥ २८ ॥

मित्रस्याप्तिः स्याद्विकोशासिलाभे वश्यं गच्छेद्भूपतेः शासनाप्तौ ।
सर्पे कर्णौ नासिकां वा प्रविष्टे तच्छेदः स्याद्वेष्टने चाशु बन्धः ॥ २९ ॥

आद्ये वर्षाद्वत्सरार्धाद्द्वितीये यामे पाको वर्षपादात्तृतीये ।
मासात्पाकः शर्वरीपश्चिमांशे सद्यः पाको गोविसर्गे च दृष्टे ॥ ३० ॥

दृष्ट्वा स्वप्नं शोभनं नेह सुप्यात् पश्चाद्दृष्टो यः स पाकं विधत्ते
शंसेदिष्टं तत्र साधुद्विजेभ्यस्ते त्वाशीभिः पूजयेयुर्नरेन्द्रम् ॥ ३१ ॥

Apparatus

25a om. Viṣṇuśarman °प्रंखोलिता° 25b भृङ्गारुध्वजपावकाभिपतनं स्रोतोवहासो भ्रमः Viṣṇuśarman 25c °दमतिप्र° Viṣṇuśarman °नीगतप्र° M 25d कायविधूर्णनं Viṣṇuśarman शिरसः om. M 26a °दीर्घं° Viṣṇuśarman 26d °तापदा° M 27a °मृदु° Viṣṇuśarman °चर्या गजानां Viṣṇuśarman 27b °मुदयराशभ M 27c °जल° Viṣṇuśarman 27d °त्वाच्चाशु शोक° Viṣṇuśarman 28a पुत्रस्य नाशः Viṣṇuśarman 28b कलहाय नित्यम् Viṣṇuśarman 28d स्वप्नेऽप्यनिष्टा Viṣṇuśarman 29b वश्यं राजा गच्छते Viṣṇuśarman 29d तच्छेद M 30a वर्षे M 30b-d वर्षपादात् to पाको om. M 31a स्वप्ने दृष्टे शोभनेनेव विद्यात् Viṣṇuśarman 31b यस्य Viṣṇuśarman 31c तद्वक्तव्यं साधु मित्र° Viṣṇuśarman 31d चाशीर्भिर्वर्धयेयु° Viṣṇuśarman

भूयः प्रस्वपनं न चास्य कथनं गङ्गाभिषेको जपः
शान्तिः स्वस्त्ययनं निषेवणमपि प्रातर्गवाश्वत्थयोः ।
विप्रेभ्यश्च तिलान्नपानकुसुमैः पूजा यथाशक्तितः
पुण्यं भारतकीर्तनं च कथितं दुःस्वप्नविच्छित्तये ॥ ३२ ॥

इति बृहद्यात्रायां स्वप्नाध्यायः षोडशः ॥ १६ ॥

क्षीरैकतरुनगार्णवतूलनदीसङ्गमाः सरः शोष्यम् ।
गोस्थानपट्टसुरालयरुचिराः स्नानप्रदेशाः स्युः ॥ १ ॥

समगम्भीरानूषरशाड्वलभूमौ प्रदक्षिणजलायाम् ।
काष्ठारश्मिप्रमितं वास्तु लिखेत् सर्वतो भद्रम् ॥ २ ॥

सर्वैर्धान्यैस्तिलमुद्गमाषचणकातसीपरिश्लिष्टम् ।
अच्छिन्नाग्रैर्दर्भैः कुशैः स(मस्ता)त् परिस्तीर्णम् ॥ ३ ॥

रजतमणिहेमगर्भैः सक्षीरप्रवालसितसूत्रै(श्च) ।
कलशैः कालमूलैश्च शोभितद्वारं (तन्मध्ये) ॥ ४ ॥

तन्मध्ये ब्राह्मी ब्रह्मा साम दूर्वाग्रशंखपुष्पाः स्युः ।
दिङ्मुखमरत्नितुङ्गं स्थाप्यं पीनं सप्रवेष्टम् ॥ ५ ॥

तस्य ग्रहानुलोमं कालं केचिज्जगुर्निषेवेत ।
पुरोध........षाष्टिकयवपायसाहारम् ॥ ६ ॥

अभिमतदेवकृतमनाः पूर्वद्वारेण पार्थिवः प्रविशेत् ।
भद्रासनं प्रदक्षिणमध्यासित्वाथ तस्य विधिः ॥ ७ ॥

Apparatus

32a भूयोऽपि स्वपनं Viṣṇuśarman 32c विप्राणां च Viṣṇuśarman °भदानकु° Viṣṇuśarman Col. महायात्रायां M पञ्चदशः M

1b सरोः शोष्यं M 2c ज्ञष्टा° M 3c अच्छिन्नाग्रादर्भै° M 5d सप्रदूद (?) षट् M 6a ग्रहानलोम्यं M

प्रियङ्गुसिद्धार्थकनागदानगोरोचनाक्षैर्घृतैः समेतैः ।
प्रागात्मरक्षा प्रतिचक्रपूतैः स्नानोन्मुखस्यावनिपस्य कार्या ॥ ८ ॥

श्वेतस्य बभ्रोरथवा वृषस्य चर्मास्तरे व्याघ्रमृगेन्द्रयोर्वा ।
तत्स्थस्य कुर्यान्मनुजेश्वरस्य जयाभिषेकं विधिवत् पुरोधाः ॥ ९ ॥

क्रमान्महीरूप्यसुवर्णकुम्भैः क्षीरस्य दध्नो हविषश्च पूर्णैः ।
स्नायाच्च तोयैः सह सप्तमृद्भिः पश्चाच्च सर्वौषधिगन्धतोयैः ॥ १० ॥

परिजप्य महारौहिणकुष्माण्डकुवेरहृदयरुद्रगणैः ।
अभिषेचयेन्नरेन्द्रं पुरोहितोऽस्मिन् समृध्या च ॥ ११ ॥

द्वात्रिंशतिं षोडश वाथवाष्टौ घटप्रमाणं मुनिभिः प्रदिष्टम् ।
स्नातस्त्वलङ्कारमपास्य पूर्वं नवं विदध्याद्द्विजमन्त्रपूतम् ॥ १२ ॥

मागधबन्दिसुहृद्द्विजसूतैरभिमतवाकृतमङ्गलकुशलः ।
चर्मसु चोपविशेदभिषिक्तः पृषतगजेन्द्रविडालवृकाणाम् ॥ १३ ॥

गृहीतधूपाम्बरमाल्यगन्धस्त्रिर्भ्रामयित्वोपरि चौषधींश्च ।
वामेऽस्य पार्श्वेऽग्रत आस्थितो वा प्रतीपपातं जुहुयाद्धुताशम् ॥ १४ ॥

गोरोचनाहेमफलानि सर्पिर्ब्राह्मीं सदूर्वां सितसर्षपांश्च ।
आसेव्य सर्वाणि यथोपदेशं भक्त्या द्विजान् स्वस्ति च वाचयित्वा ॥१५॥

सौम्येन यायात् फलपुष्पपाणिर्द्वारेण पश्येन्न च पौरुहूतम् ।
प्रागुद्धरेद्दक्षिणपादमेवं कुर्वन्नृपः सर्वरिपून् प्रशास्ति ॥ १६ ॥

इति बृहद्यात्रायां विजयस्नानोऽध्यायः सप्तदशः ॥ ३०९ ॥ १७॥

Apparatus :

8b °नाक्षौ घृ° M 8c f. 17r of B Begins with पूतैः 9b ° योश्च M 10a °रोप्य° B 10b क्षिरस्य दग्धो M 10c तोयैश्च समस्तमृद्भिः M 11a-b °रोहिणी-कूश्माण्ड° M °कुवेर° om. M 11c °न्नृपतिं B 12a °त्रिंशतं B, °त्रिंशकं M 12c स्नातो ह्य° M 12d सर्वं विदध्या° M 13b °मङ्गल इष्टम् M 13c-d °षिक्तो वृषभखगेन्द्रविलालमृगाणाम् M 14a-b °गंधे स्त्रीभ्रा° M 14c ग्रहणास्थितो M 14d प्रतिपवातं B 15a °हेमफ° om. B 15b ब्रह्मीं° M 16b पलाश्च M 16d कुर्वन् om. M Col. इति om. B स्नानोऽध्या om. B इति महायात्रायां विजय-स्नानं षोडशोऽध्यायः M

ग्रहयज्ञमतो वक्ष्ये तत्र निमित्तानि लक्षयेद्द्वेद्याम् ।
भङ्गो मानोनायां दिग्भ्रष्टायामसिद्धिश्च ॥ १ ॥

नगरपुरोहितदेवीसेनापतिपार्थिवक्षयं कुरुते ।
प्राग्दक्षिणापरोत्तरमध्यमभागेषु या विकला ॥ २ ॥

तत्रार्चा ताम्रमयी सवितुः पालाशिका सुस्रुक्समिधः ।
आ कृष्णेति च मन्त्रो रक्ता गन्धाः सहागुरुणाः ॥ ३ ॥

माषातसीतिलांश्चार्कसमुद्गचणकान् विहाय भोज्यविधिः ।
वकुलार्कागस्त्यपलाशशल्लकीकुसुमपूजा च ॥ ४ ॥

अष्टशतसंमितेभ्यो विप्रेभ्यो दक्षिणाहिताग्निभ्यः ।
देया वृषकनकमही सहस्रकिरणं (स)मुद्दिश्य ॥ ५ ॥ (सूर्यः)

न्यग्रोधात् स्रुक्समिधः स्फटिकादर्चा च शीतगोः कार्या ।
शैलेयकनखवर्ज्या गन्धाः कुसुमानि च सितानि ॥ ६ ॥

गोधूमशालियावरवण्डगोपयःपूर्वमशनमथ मन्त्रः ।
आप्यायस्वेति भवेच्चातुर्वेदाय दद्याच्च ॥ ७ ॥

मणिमुक्ताक्षौमहिरण्यसंयुतां श्वेततुल्यवत्साङ्गाम् ।
रजतशफविषाणां क्षीरिणीं च तु हिमांशुमुद्दिश्य ॥ ८ ॥ (चन्द्रः)

Testimonia :

1-2 cited by Utpala on *BS* 43, 14 3-5 cited by Utpala on *BS* 47, 29-33

Apparatus

1d द्विगरुषाया° M 3a °मय° Utpala 3b पालाशिकी Utpala च ब्रुसमिद्धः M, समित् स्त्रुक् च Utpala 3c च om B 3c सहागरुणा M, सहागुरुणा B Utpala. 4a माया° B °तसीतिलाः श्वकं B, °तसीतिलाल्वक° Utpala, च शाड्वल° M, 4b समुद्रक्षणकान् B, समुद्रलम्नगान् M, °मुद्गान् चणकान् Utpala 4c °र्कागस्ति° M 4d °शल्यकी° Utpala, °नुल्यकी° M. 5a °सस्मिते° Utpala, °म्मिते° B 5d स्र° Utpala 6a स्त्रीक्यमिधः B, स्रक्सममिधः M 6c °नग° B 7a °नाव° B 8d तुहिनांशु BM

रक्तकरवीरसमिधो रक्ता गन्धाश्च चन्दनात् प्रतिमा ।
मन्त्रश्चाग्निर्मूर्धेत्यशनं गुडषष्टिकप्रायम् ॥ ९ ॥

ताम्रकनकप्रवालौर्णिकानि देयानि दक्षिणा चास्य ।
उद्दिश्य धरातनयं छन्दोगेभ्यो व्रतस्थेभ्यः ॥ १० ॥ मं(गलः)

मन्त्रश्चोद्बुध्यस्वेत्यादि प्रतिमा च युक्तिलोहमयी ।
स्रुक्समिधश्च मधूकादथवा चान्द्रेरपामार्गात् ॥ ११ ॥

युक्तिप्राया गन्धाः कालीयककुङ्कुमप्रियंग्वाद्याः ।
कुसुमानि मालतीवकुलतिलकमदयन्तिकादीनि ॥ १२ ॥

भोज्यं मसुरतिलशालिमुद्गचणकादि दक्षिणा स्वच्छश्च ।
सरजतमणिर्व्रतिभ्यश्चान्द्रेराथर्वणेभ्यश्च ॥ १३ ॥ बु(धः)

अश्वत्थ्यर्जुनसमिधः कनकार्चा त्वम्निवर्जिता गन्धाः ।
पीतकुसुमानि च गुरोर्भोज्यं तिलमुद्गचणकानि ॥ १४ ॥

बह्वृग्भ्य एकवर्णं मध्यमवयसं तुरङ्गमं दद्यात् ।
शृङ्गीसुवर्णयुक्तं बृहस्पतेश्चेति गुरोर्मन्त्रः ॥ १५ ॥ बृ(हस्पतिः)

रजतार्चा मदनीया गन्धाः कुसुमानि चित्रसुरभीणि ।
पनसोदुम्बरसमिधो भोज्यं वृष्यं च भृगुसूनोः ॥ १६ ॥

अन्नात् परिस्रुताद्यो मन्त्रः स्त्रीकर्कशास्त्वलङ्काराः ।
अध्वर्युभ्यो देया द्वात्रिंशद्भ्यः तदर्हेभ्यः ॥ १७ ॥ शु(क्रः)

Apparatus :

9d °गुल° M 10d छंदोर्वेभ्यो B मं om. M 11a °स्वेत्या° om. M °ति M 11b प्रतिमास्य तु शक्ति° M 11c स्त्रीक्यमिधश्च B 12b कालेयक° M °प्रियंग्याद्वा: B 13a मसुरं तलशालि° B, मसूरतिल° M 13b/14b स्वच्छश्च to °वर्जिता om. M 13b श्वत्तर: B 14a अश्वत्थीर्जुन° B 14c च om. B 14d तिलमाषमुद्ग° B °वटकादि M 15a वह्वग्भ्य B, बह्विभ्य M 15d बृहस्पतेश्वति B, बृहस्पते इति M बृ om. M 17a अन्ना M 17a-b °स्रुतो मंत्रो दक्षिणा स्त्री° B 17d °तन्येभ्य: B शु om. M

शालशमीस्रुक्समिधः शन्नो देवीति भास्करेर्मन्त्रः ।
लोहार्चा शैलेयकमुस्तकशुत्त्युत्कटा गन्धाः ॥ १८ ॥

गिरिकर्णिकातसीस्पन्दनांजनादीनि कृष्णपुष्पाणि ।
अशनानि कृष्णतिलमाषचणकनिष्पावमुख्यानि ॥ १९ ॥

प्रेष्यामतीतवयसां त्रप्वंजनसीसकृष्णलोहयुताम् ।
दद्यादुद्दिश्यार्किं वृषलीपतिवृद्धमूर्खेभ्यः ॥ २० ॥ श(निः)

वैभीतस्रुक्समिधो राहोर्होमेऽथवा भवेद्दूर्वा ।
मन्त्रश्च कया नश्चित्रपूर्वकोऽर्चा च नागमयी ॥ २१ ॥

उद्दिश्य सैंहिकेयं महिषं प्रतिपादयेत् सुवृद्धेभ्यः ।
विप्रेभ्य इति यदन्यत् तत्सर्वं सूर्यपुत्रसमम् ॥ २२ ॥ (राहुः)

केतोः कांस्यप्रतिमा केतुं कृण्वन्न केतवे मन्त्रः ।
आरण्यकुसुमपूजा स्रुक्समिधः खदिरकुशमय्यः ॥ २३ ॥

मांसौदनमशनं ब्रह्मबन्धुवर्गस्य दक्षिणा देया ।
प्रहरणफल्गुद्रव्याणि चैवं केतुं समुद्दिश्य ॥ २४ ॥ (केतुः)

(इति) बृहद्यात्रायां ग्रहयज्ञाध्यायोऽष्टादशः ॥ ३३३ ॥

कृत्वैवं ग्रहपूजामृचा ततश्चाग्निलिङ्ग्या जुहुयात्।
श्लोकांश्चास्मिन्नर्थे काश्यपमुनिचोदितान् वक्ष्ये ॥ १ ॥

ततोऽप्रतिरथं कृत्स्नं यात्रालिङ्गं च यद्भवेत् ।
आयुष्यमभयं चैव सर्वं चैवापराजितम् ॥ २ ॥

Apparatus :

18c लोहादर्चा M 18c-d शैलेकमुस्तकशंत्यु° B, शैलेयमुस्ताश्शुक्त्यु° M
19b °दी° om. M 19c भोज्यानि 19d °निस्याप° B, °निष्वाप° M
20a प्रेष्यमतीतवयसं M 20b रूपाञ्जनकृष्णलोहयुतं M 20d श om. M
21a वैभीतिक्यः स° B, वैभीतव्यस्रुक्स° M 21b भवेद् om. M 21c °श्च om. B
22b प्रवृद्धेभ्यः M 23a कांसा° B, कांसि° M 23d °मय्यः B 24a मांसोत्तर° M
24d चैवं om. M केतुमुद्दिश्य M Col. om. M

1c °न्नर्थे om. B 1d कश्यप° B 2d चेति पराजितः M

शर्मवर्मगणं चैव तथा स्वस्त्ययनं गणम् ।
एतान् पञ्चगणान् हुत्वा संस्थाप्याग्निं यथाविधि ॥ ३ ॥

भूत भूतेति च गणं यत्ते चन्द्रस्तथैव च ।
ऐन्द्रो गणस्तथा चान्द्रो मन्त्राशीःसूक्तमेव च ॥ ४ ॥

भूयो भूयस्तथा ज्वालां संस्पृश्याथ पुरोहितः ।
स्पृशेच्च नृपतिं मन्त्रैरुच्चैर्ब्रूयात् पुनः पुनः ॥ ५ ॥

चक्षुर्दः प्राणदश्चापि वर्चोदश्च भव प्रभो ।
अनाधृष्यतमश्चासि यथा त्वं हव्यवाहन ॥ ६ ॥

शात्रवाणां तथा राजाप्यनाधृष्यो भवत्ययम् ।
हूयमाने निमित्तानि वक्ष्याम्यहमतः परम् ॥ ७ ॥

कम्पोत्कासविजृम्भणप्रचलनस्वेदाश्रुपातक्षुधो-
  द्राराद्यं च पुरोधसः स्मृतिविपच्चानिष्टमन्यच्छुभम् ।
आज्यं केशपिपीलिकामलयुतं सत्त्वावलीढं च यत्
  तन्नेष्टं शुभमन्यथोपकरणं द्रव्याण्यनूनानि च ॥ ८ ॥

उत्थाय स्वयमुज्ज्वलार्चिरनलः स्वाहावसाने हवि-
  र्भुंक्ते देहसुखः प्रदक्षिणगतिः स्निग्धो महान् संहतः ।
निर्धूमः सुरभिः स्फुलिङ्गरहितो यात्रानुलोमो मृदु-
  र्मुक्तेन्दीवरकांचनद्युतिधरो यातुर्जयं शंसति ॥ ९ ॥

Testimonia

8-10 cited by Utpala on *BS* 43, 14

Apparatus :

3a शर्मखर्मगणश्चैव M 3c एकत्वं च गणान् हुत्वा M 4a भूत om. M भूनेति M 4a-b गणयत्ते M °न्द्रस्तथै° om. B 4d मात्रा श्री M 5a भूयस्ततो M 5c-d मंत्रैरेवं M 6a चक्षुर्दिः B °श्चासि B 6b वर्गेदश्च B 6c अनाधृ-ष्यतंश्चासि B °तमाश्चासि M 7b °प्यनाधृव्यो B, त्वनायुष्यो M 7c यजमाने M 8a कम्पोच्छ्वास° Utpala °प्रविच्चित° M °वातक्षुता M, °याताः युतं B 8b गाद्र्द्यं B, गात् गद्यं M स्त्वितिवि° M °मन्वत्शुभम् B 8c °वलीडं M 8d °मन्वथो° B, °मन्यतो° M च M Utpala, गा B 9b °सुख° Utpala, °सुखं M 9c सुगतिः B 9d कुंदेंदीवर° B वह्निःश्रियं यच्छति Utpala

इष्टद्रव्यघटातपत्रतुरगश्रीवृक्षशैलाकृति-
भेर्यब्दोदधिदुन्दुभीभशकटस्निग्धस्वनः पूजितः ।
नेष्टः प्रोक्तविपर्ययो हुतवहः स्निग्धोऽन्यथापीष्टदः
सव्येऽङ्गं नृपतिं दहन्नतिहितः शेषं च लोकाद्वदेत् ॥ १० ॥

इति बृहद्यात्रायामग्निलक्षणाध्याय एकोनविंशः ॥ ३४३ ॥

व्रजेद्दिगीशं हृदये निवेश्य यथेन्द्रमैन्द्यामपराश्च तद्वत् ।
सुशुक्लमाल्याम्बरभृन्नरेन्द्रो विसर्जयेद्दक्षिणपादमादौ ॥ १ ॥

सितातपत्रो मणिरत्नशोभः प्रधूयमानैः सितचामरैश्च ।
जयस्वनापूरितराजमार्गो द्विजेन्द्रमन्त्राभिविवृद्धतेजाः ॥ २ ॥

कल्याणनामसचिवाप्तजनायुधीय-
दैवज्ञविप्रजनकंचुकिमध्यसंस्थः ।
द्वात्रिंशतं समुपगम्य पदानि भूमौ
प्रागादि नागरथवाजिनरैः प्रयायात् ॥ ३ ॥

इति बृहद्यात्रायां प्रस्थानिकाध्यायो विंशतितमः ॥ ३४६ ॥

10b मेर्यम्भो° M °स्वनैः Utpala 10c °विपर्यये Utpala ऽन्यथानेष्टदः M 10d नृपतेर्दह° Utpala °न्नपि हितः M Col. इति om. B

इति महायात्रायां गृहयज्ञाध्यायः सप्तदशः M

Tetimonia

3 cited by Govinda on *MC* 11, 89 3d cited by Govinda on *MC* 11, 90

Apparatus :

1b °मैन्द्यम° M 2a घृतातपत्रो M 2a-b °शोभितो विधूयमायैः M 2d °भिविशुद्धतेजाः M 3a कल्याणनर्म° M °सचिवाप्त° B 3b °कांचिक° M 3c द्वात्रिंशकं M 3d प्रागादिताश्च रथ° M °नरैस्तु यायात् Govinda Col. इति om. B इति महायात्रायां अभिनिर्गमो नाम अष्टादशोऽध्यायः M

माभूत् प्रसङ्गादतिविस्तरोऽत्र गजाश्वपुंलक्षणदर्शनेषु ।
निमित्तमात्रं कथयाम्यतोऽहं प्रयाणकालोपयिकं नृपाणाम् ॥ १ ॥

ताम्रौष्ठताल्वदनाः कलविङ्कनेत्राः
स्निग्धोन्नताग्रदशनाः पृथुलायतास्याः ।
चापोन्नतायतनिगूढनिमग्नवंशा-
स्तन्वेकरोमचितकूर्मसमानकुम्भाः ॥ २ ॥

विस्तीर्णकर्णहनुनाभिललाटगुह्याः कूर्मोन्नतैर्द्विनवविंशतिभिर्नखैश्च ।
रेखात्रयोपचितवृत्तकराः सुवाला धन्याः सुगन्धिमदपुष्करमारुताश्च ॥ ३ ॥

दीर्घाङ्गुलिरक्तपुष्कराः सजलाम्भोदनिनादबृंहिणः ।
बृहदायतवृत्तकंधरा धन्या भूमिपतेर्मताङ्गजाः ॥ ४ ॥

निर्मदाभ्यधिकहीननखाङ्गान् कुब्जवामनकमेषविषाणाम् ।
दृश्यकोशफलपुष्करहीनान् श्यावनीलशबलासिततालून् ॥ ५ ॥

स्वल्पवक्त्ररुहमत्कुणखण्डान् हस्तिनीं च गजलक्षणयुक्ताम् ।
गर्भिणीं च नृपतिः परदेशं प्रापयेदतिविरूपफलास्ते ॥ ६ ॥

दत्तमूलपरिणाहदीर्घतां द्विः प्रमुच्य परतोऽस्य कल्पयेत् ।
श्यावपूतिमलरक्तदर्शनं पापसत्त्वसदृशं च पापदम् ॥ ७ ॥

पार्थिवोपकरणाकृतिं यदा चिह्नमुद्वहति कल्पिते रदे ।
श्रीजयार्थबलवृद्धयस्तदा स्निग्धशुक्लरुचिराश्च शोभनाः ॥ ८ ॥

Testimonia

1. cited by Utpala on *BY* 13, 10 2-10 equal *YY* 13, 1-9 7 cited by Utpala on *BS* 93, 1 8 cited by Utpala on *BS* 93, 7

Apparatus:

1a °स्तरो om. B 1a-b °विस्तरोरगजाम्वपंलक्षणदर्शनेषु Utpala 1b गजाश्व पुं° M, गजाश्वफु° B °दर्शनेन B 2a °तलदशनाः M कलविंग° B, कलपिङ्ग° M 3b °द्विनलविंशति° M 5a °नखांशान् M 5d श्याम° M 6a °वक्तकरमेष-विषाणान् M 6d °विरुद्ध° M 7b विप्रमुच्य M ऽपि Utpala 7c °मलिक्त° M 7d सर्पसत्त्व° Utpala 8a °करणाकनी M, °करणोपमं Utpala 8c श्रीबलार्थ° M 8d °शुष्क° M °रुचिरास्तु B

दक्षिणे शुभमतीव शोभनं पापमप्यतिविरूपमन्यतः ।
याप्यता भवति तद्विपर्यये विस्तरोऽन्यमुनिभिः प्रकीर्तितः ॥ ९ ॥

मूलमध्यदशनाग्रसंस्थिता देवदैत्यमनुजाः क्रमात्ततः ।
स्फीतमध्यपरिपेलवं फलं शीघ्रमध्यचिरकालसम्भवम् ॥ १० ॥

दन्तभङ्गफलमत्र दक्षिणे भूपदेशबलविद्रवप्रदम् ।
वामतः सुतपुरोहिते भयान् हन्ति साटविकदारनायकान् ॥ ११ ॥

आदिशेदुभयभङ्गदर्शनात् पार्थिवस्य सकलं कुलक्षयम् ।
सौम्यलग्नतिथिभादिभिः शुभं वर्धतेऽशुभमतोऽन्यथा भवेत् ॥ १२ ॥

क्षीरवृक्षफलपुष्पपादपेष्वापगातटविघट्टनेन वा ।
वाममध्यरदभङ्गखण्डने शत्रुनाशकृदतोऽन्यथापरम् ॥ १३ ॥

स्खलितगतिरकस्मात् त्रस्तकर्णोऽतिदीनः
श्वसिति मृदु सुदीर्घं न्यस्तहस्तः पृथिव्याम् ।
द्रुतमुकुलितदृष्टिः स्वप्नशीलो विलोमो
भयकृदहितभक्षी नैकशोऽसृच्छकृत्कृत् ॥ १४ ॥

Testimonia:

10 cited by Utpala on *BS* 93, 8 11-15 equal *BS* 93, 9-13 and *YY* 13, 10-14 14 - 15 and 13 cited by Utpala on *BS* 43, 17-18 14-15 equal *TY* 9, 9-10

Apparatus :

9b °विरुद्ध° B 9d ऽस्य मुनिभिः M 10a °रदनाग्र° M 10b ततः क्रमात् M 10c पूर्ण° M °परितपलवं B, °परिपेलवाश्च M 10a-12b फलं to कुलक्षयं om. M 12d वदेत् *BS* 13a क्षीरमिष्ट° B, क्षीरमृष्ट° *BS* 13b °विघट्टितेन *BS* Utpala, °विघट्टने M ऽथ M 13c °मध्य° om. M °खंडनं BM 13d om. Utpala फलं *YY* 14a खलिगेतिर° M त्रस्तरूपो M 14b श्वसति *TY*, श्वसति M न्यस्तबाहुः M 14c द्द° B, om. M विलोमो om. M 14d शुत् सकृच्च B, मुतकृच्च M, सकृशकृच्च Utpala

वल्मीकस्थाणुगुल्मक्षुपतरुमथनः स्वेच्छया हृष्टदृष्टि-
र्यायाद्यात्रानुलोमं त्वरितपदगतिर्वक्त्रमुन्नाम्य चोच्चैः ।
कक्षासन्नाहकाले जनयति च मुहुः शीकरं बृंहितं वा
तत्कालं वा मदाप्तिर्जयकृदथ रदं वेष्टयन् दक्षिणं च ॥ १५ ॥

इति बृहद्यात्रायां गजलक्षणेङ्गिताध्याय एकविंशतिः ॥ ३६० ॥

आवर्तसत्त्वद्युतिवर्णजातियानस्वराङ्गादिगुणोपपन्नाः ।
संक्षेपतोऽश्वा विजयाय राज्ञामावर्तलेशोपनयो यतोऽयम् ॥ १ ॥

अश्रुपातहनुगण्डहृद्गलप्रोथशङ्खकटिवस्तिजानुषु ।
मुष्कनाभिककुदे तथा गुदे सव्यकुक्षिचरणेषु चाशुभाः ॥ २ ॥

ये प्रपानगलकर्णसंस्थिताः पृष्ठमध्यनयनोपरिस्थिताः ।
ओष्ठवक्त्रिभुजकुक्षिपार्श्वगास्ते ललाटसहिताः सुशोभनाः ॥ ३ ॥

वालावकिरणहेषितधूमज्वालादि चोद्यमे लक्ष्यम् ।
तुरगाणामत्रार्याः प्रकीर्तिता विष्णुगुप्तकृताः ॥ ४ ॥

तत्रोत्सर्गेणासनपश्चिमभागाश्रये ज्वलनमेषाम् ।
नेष्टमितरत्र शस्तं वामेतरपार्श्वयोस्तद्वत् ॥ ५ ॥

15a °गुन्म° M °क्षुत° M, °तृण° *TY* °रुमथ° om. B 15b °मुन्नम्य B M *YY* 15c कक्ष्या M *BS* Utpala सुमहच्छीकरं M *YY TY* बृंहते *TY* 15d तत्काले *BS* मदाप्तौ *YY TY*, मभाप्तो M °णश्च M, °णं वा Utpala Col: इति om. B इति महायात्रायां हस्ति(स्ती) ङ्गितविधिः एकोनविंशोऽध्यायः M

Testimonia :

5 cited by Utpala on *BS* 92, 1

Apparatus

1a आवर्त्ति° B 1a-b °जातिषु यातुः M 1d °मावर्ति° B 2a अश्रुवात° M 2b °द्गले प्रोतशङ्खकरि° M 2c गुदेऽथवा M 3a प्रनाल° M 3c उष्टसक्ति° B, ओष्टवक्ति° M 4a °विकरण° B 4b °ज्वालाभिवोद्यमे M 4c-d °मंत्रार्याः प्रक्षिप्ता B 4d °गुप्ताकृताः B, गुप्तकराः M 5a °र्गासन्ने B, °र्गेणाधः M 5b °मेवम् Utpala 5d °स्तद्यत् B

सममन्यत् पद्केसरपुच्छेषु ज्वलनदहनकणधूमाः ।
राष्ट्रभयरोगसम्भ्रमसपत्नचक्रापमर्दकराः ॥ ६ ॥

प्राक्फलतुल्यं पृष्ठे जघने वालेषु चैव निर्दिष्टम् ।
अन्तःपुरप्रकोपो मेढ्रज्वलने सधूमे वा ॥ ७ ॥

नित्यं च वालकिरणे दाहज्वालास्फुलिङ्गकणधूमाः ।
स्कन्धासनांसदेशे वधाय बन्धाय च रणेषु ॥ ८ ॥

वक्षोक्षिललाटभुजेष्वश्वानां हेषतां च वदनेभ्यः ।
ज्वालोत्पत्तिर्जयदा धूमोत्पत्तिः स्वामिनोऽभावाय ॥ ९ ॥

नासापुटाश्रुपातप्रोथशिरोलोचनेषु रजनीषु ।
विजयाय प्रज्वलनं ताम्रासितहरितशवलानाम् ॥ १० ॥

विजयाय सर्वैदेव हि सुशुक्लशुकवर्णयोर्ज्वलनमेषु ।
एवं च यथासम्भवमन्येष्वपि वाहनेषु फलम् ॥ ११ ॥

इष्टानिष्टव्यंजकमतः परं हेषितं समवधार्यम् ।
तच्च प्रसारिताचलशिरोधरोद्भूतमिष्टफलम् ॥ १२ ॥

ग्रासान्तर्वक्त्राणामुच्चैः स्निग्धानुनादि गम्भीरम् ।
द्विजपूर्णभाजनेष्टद्रव्यस्रग्गन्धसुरमूलैः ॥ १३ ॥

Testimonia:

6-11 cited by Utpala on *BS* 92, 4 12-14 cited by Utpala on *BS* 92, 9

Apparatus :

6a सम्मध्यवादकेसर° M 6c °यशोक्रस° Utpala 6d °सत्न° B, प in marg. B², °सवर° M °वक्ता° Utpala °वमर्द° M, °पमर्दन° B 8b °लिङ्गश्वधूमाः M, °लिङ्गानाम् Utpala 8d वधाय]धूमा Utpala 9a °क्षि° om. M 9b त्वश्वानां Utpala हेषिते M ह्रेषितं Utpala च om. B 9d °त्पत्तिस्त्वभावाय M Utpala 10a °शुघात° B, °श्रुपाथ° M 10b °लोचने च Utpala 11a सर्वभैव M 11b °शुक° om. M °वर्णज्वलन° M °मेतेषु B 11d वाहने B 12b ह्रेषितं Utpala समाधार्यं M 12c तत्र B चलितप्रसारित° Utpala 13a °न्त-वक्त्रा° BM 13d °स्रग्गन्धि° Utpala °सूरमूलेव M

खलिनान्नपानवर्मस्वाम्युपकरणाभिनन्दिता चैषाम् ।
सर्वार्थसिद्धये स्याद्दक्षिणपार्श्वं विलोकयताम् ॥ १४ ॥

सन्ध्यासु दीप्तदिङ्मुखसम्भ्रमगाढप्रनष्टनिद्राश्च ।
हेषन्तो भयजनना वधबन्धपराजयकराश्च ॥ १५ ॥

वक्रीकृतवालधयो दक्षिणपार्श्वानुशायिनो नेष्टाः ।
वामचरणैः क्षितितलं घ्नन्तो ज्ञेयाः प्रवासाय ॥ १६ ॥

सजृम्भणं पृष्ठविधूननं च वालप्रकारस्त्वसकृल्लिलिक्षोः ।
पादेन पादाकलनं प्रसङ्गः सेनासमुद्योगदृशां हयानाम् ॥ १७ ॥

निद्रानिरोधालसनीलनेत्राः प्रध्यानशून्यस्मृतयो दिनेषु ।
निशासु चान्योन्यविरोधनष्टनिद्रास्तुरङ्गा न शिवाय भर्तुः ॥ १८ ॥

जंघे लिहन्व्रणरोमपङ्के पादौ च संहृष्टतनुर्जयाय ।
विपर्ययः पश्चिमयोः प्रयत्नात् स्वयं तु यात्राभिमुखो नियम्य ॥ १९ ॥

मुहुर्मुहुर्मूत्रशकृत् करोति न ताड्यमानोऽप्यनुलोमयायी ।
अकार्यभीतोऽश्रुविलोचनश्च शिवं न भर्तुस्तुरगो विधत्ते ॥ २० ॥

आरोहति क्षितिपतौ विनयोपपन्नो यात्रानुगोऽन्यतुरगं प्रतिहेषितश्च ।
वक्त्रेण वा स्पृशति दक्षिणमात्मपार्श्वं योऽश्वः स भर्तुरचिरात् प्रतनोति लक्ष्मीम् ॥२१

इति बृहद्यात्रायां वाजिलक्षणेङ्गिताध्यायो द्वाविंशः ॥ ३८१ ॥

Testimonia :

15-16 cited by Utpala on *BS* 92, 11c 18 cited by Utpala on *BS* 92, 5 20-21=*TY* 9, 8+7=*YY* 15, 16+15=*BS* 92, 14+13; cited by Utpala on *BS* 43, 17-18 and By Śivarāja on P. 216.

Apparatus:

14a सितान्नपान॰ M °चर्म° M, °धर्म° Utpala 14b ऽभिर्यदीनामेषां B, °दिमुदितं चैषां M 14d °पार्श्वे Utpala 15a सस्यासु M 15b °ढप्र° om. M 15c हेषन्तो Utpala 17c-d पदा च पादावनप्रसङ्गः ननादमुद्योग° M 18b प्रघान° B, प्रध्वास° M 18c-d °निद्रानष्टा° Utpala 19a लिहन्त्य° M 19b संहृष्टतरं M 19d °मुखो यदि स्यात् M 20a °मूत्रमलं Śivarāja 20b न om. M 20d गन्तुस्तुरगे M ऽभिधत्ते *YY*, *TY*, *BS*, Utpala, Śivarāja 21b ऽन्यहयहेषणहेषितश्च M प्रतिहेषितं च B, प्रतिहेषते च *BS* Utpala 21c वक्त्रौ वा M दक्षिणवामपार्श्वं M 21d प्रचिनोति M *YY*, *TY*, *BS* col. इति om. B इति महायात्रायां अश्वेङ्गितविधिर्नाम विंशोऽध्यायः M

अन्यजन्मान्तरकृतं पुंसां कर्म शुभाशभम् ।
यत्तस्य शकुनः पाकं निवेदयति गच्छताम् ॥ १ ॥

ग्राम्यारण्याम्बुभूव्योमद्युनिशोभयचारिणः ।
रुतयातेक्षितोक्तेषु ग्राह्याः पुंस्त्रीनपुंसकाः ॥ २ ॥

पृथग्जात्यनवस्थानादेषां व्यक्तिर्न लभ्यते ।
सामान्यलक्षणोद्देशो श्लोकावृषिकृताविमौ ॥ ३ ॥

पीनोन्नतविकृष्टाङ्गाः पृथुग्रीवाः सुवक्षसः ।
स्वल्पगम्भीरविरुताः पुमांसः स्थिरविक्रमाः ॥ ४ ॥

तनुग्रीवशिरोनासाः सूक्ष्मास्यपदविक्रमाः ।
प्रसन्नमृदुभाषिण्यः स्त्रियोऽतोऽन्यं नपुंसकम् ॥ ५ ॥

ग्राम्यारण्यप्रचाराद्यं लोकादेवोपलक्षयेत् ।
संविक्षिप्सुरहं वच्मि यात्रामात्रप्रयोजनम् ॥ ६ ॥

पथ्यात्मानं नृपं सैन्ये पुरे चोद्दिश्य देवताम् ।
सार्थे प्रधानं साम्ये तु जातिविद्यावयोधिकम् ॥ ७ ॥

मुक्तप्राप्तैष्यसूर्यासु फलं दिक्षु तथाविधम् ।
अङ्गारदीप्तधूमिन्यस्ताश्च शान्तास्ततोऽपराः ॥ ८ ॥

तत्पञ्चमदिशां तुल्यं फलं त्रैकाल्यमादिशेत् ।
परिशेषदिशोर्वाच्यं यथासन्नं शुभाशुभम् ॥ ९ ॥

Testimonia :

1 cited by Śivarāja (p. 211) and by Govinda on *MC* 11, 100-101 6 cited by Utpala on *By* 13, 10

Apparatus :

1n M 23 follows 30, 3 1b कर्म पुंसां M Śivarāja शुभं वा यदि वाशुभं Govinda 1c पाकं शकुनो Govinda 1d गच्छतः Śivarāja 2d स्त्रीपुन्न° M 3a पृथग्गात्र्य° B, पृथक्जात्य° M 3a-b °स्थानां एषां M 3c-d °लक्ष्यते द्देशश्लोकात्रृष्टि° M 4a °विकृष्वांसाः B 4c °विनुताः M 5a °शिरोरस्काः BM 5c प्रसक्त° B 7a पश्यमानं M 7c प्रदानं M साम्येषु M 8d °स्ततः परः M 9b °माविशेत् B 9c-d om. M

शीघ्रमासन्ननिम्नस्थैश्चिरादुन्नतदूरगैः ।
स्थानवृध्युपघाताश्च तद्वद्‍ब्रूयात् फलं बुधः ॥ १० ॥

क्षणतिथ्युडुवातार्कैर्दैवदीप्तो यथोत्तरम् ।
क्रियादीप्तो गतिस्थानभावस्वरविचेष्टितैः ॥ ११ ॥

दशधैवं प्रशान्तोऽपि सौम्यस्तृणफलाशनः ।
मांसामेध्याशनो रौद्रो विमिश्रोऽन्नाशनः स्मृतः ॥ १२ ॥

हर्म्यप्रासादमाङ्गल्यमनोज्ञस्थानसंस्थिताः ।
श्रेष्ठा मधुरसक्षीरफलपुष्पद्रुमेषु च ॥ १३ ॥

स्वकाले गिरितोयस्था बलिनो द्युनिशाचराः ।
क्लीवस्त्रीपुरुषाश्चैव बलिनः स्युर्यथोत्तरम् ॥ १४ ॥

जवजातिबलस्थानहर्षसत्त्वैर्बलान्विताः ।
स्वभूमावनुलोमाश्च तदूनाः स्युर्विवर्जिताः ॥ १५ ॥

कक्कुटेभचिरिल्यश्च शिखिवञ्जुलच्छिक्कराः ।
बलिनः सिंहनादाश्च कूटपूरी च पूर्वतः ॥ १६ ॥

क्रोष्टुकोलूकहारीतकाककोकर्क्षपिङ्गलाः ।
कपोतरुदिताक्रन्दक्रूरशब्दाश्च याम्यतः ॥ १७ ॥

गोशशक्रौञ्चलोमाशहंसोत्क्रोशकपिञ्जलाः ।
विडालोत्सववादित्रगीतहासाश्च वारुणाः ॥ १८ ॥

Testimonia :

16-19 cited by Govinda on *MC* 11, 106

Apparatus :

11a °पारार्कै° M 11c क्रीडादीप्तो M 12b °फलाशिनः M 12c °मेध्याशिनो M 12d विमिश्रां नाशनस्तदा M 14c °श्चैषां B 15a एवं जाति° M 15a-b °स्थान...हर्षस्वरान्विताः M 16a कक्कुटेभगिरिल्यश्च B, ककुटेभविरिल्यश्च M, कुक्कुटेभचिरल्वाश्च Govinda 16b °वंचुल° M °छित्कराः B, °सित्कताः M, °छिच्चकराः Govinda 16d कूटी पूरी M 17a-b कोष्ठकोलूककाकोक्ष...पिङ्गलाः M 18b °हंसोरग° M, °हंसक्रोश° Govinda 18c विलालो° M, विलोमो° Govinda

शतपत्रकुरङ्गाखुमृगैकशफकोकिलाः ।
चाषशल्यकपुण्याहघण्टाशंखरवा उदक् ॥ १९ ॥

न ग्राम्योऽरण्यगो ग्राह्यो नारण्यो ग्रामसंस्थितः ।
दिवाचरो न शर्वर्यां न च नक्तंचरो दिवा ॥ २० ॥

द्वन्द्वरोगार्दितत्रस्तकलहामिषकांक्षिणः ।
आपगान्तरिता मत्ता न ग्राह्याः शकुनाः क्वचित् ॥ २१ ॥

रोहिताश्वाजवालेयकुरङ्गोष्ट्रमृगाः शशाः ।
निष्फलाः शिशिरे ज्ञेया वसन्ते काककोकिलौ ॥ २२ ॥

न तु भाद्रपदे ग्राह्याः सूकराश्च वृकादयः ।
शरद्यब्जादगोक्रौञ्चाः श्रावणे हस्तिचातकौ ॥ २३ ॥

व्याघ्रर्क्षवानरद्वीपिमहिषाः सविलेशयाः ।
हेमन्ते निष्फला ज्ञेया बालाः सर्वे विमानुषाः ॥ २४ ॥

ऐन्द्रानलदिशोर्मध्ये त्रिभागेषु व्यवस्थिताः ।
कोशाध्यक्षानला जीवितपोयुक्ताः प्रदक्षिणम् ॥ २५ ॥

शिल्पी भिक्षुर्विवस्त्रा स्त्री याम्यानलदिगन्तरे ।
परतश्चापि मातङ्गगोपधर्मसमाश्रयाः ॥ २६ ॥

नैर्ऋतीवारुणीमध्ये प्रमदाः सूतितस्कराः ।
शाक्तिकः शाकुनिर्हिंस्रो वायवीपश्चिमान्तरे ॥ २७ ॥

Testimonia :

20-24 cited by Govinda on *MC* 11, 107 30 equals *BY* 24, 3

Apparatus :

19b °कशर्प° B 19c गव° B, चाष्ट° M 19d °शल्यरवा M 20a भच ग्राम्यो वने Govinda 21a °र्दितस्तल Govinda 22a रोहिताश्वाज° M, रोहितास्त्रज° Govinda 23a तु] च M ग्राम्यास् M 23b सूकरश्च B 23c वृक्षादयः क्रौंचाः Govinda 24d ऽपि मानुषाः M 27c शौर्णिकः B शाकुनी B

विषघातकगोस्वामिकुहकज्ञास्ततः परम् ।
धनवानीक्षणीकश्च मालाकारस्ततः परम् ॥ २८ ॥

वैष्णवश्चरकश्चैव वाजिनां रक्षणे रतः ।
एवं द्वात्रिंशतो भेदाः पूर्वदिग्भिः सहोदिताः ॥ २९ ॥

राजा कुमारो नेता च दूतः श्रेष्ठी चरो द्विजः ।
गजाध्यक्षश्च पूर्वाद्याः क्षत्रियाद्याश्चतुर्दिशः ॥ ३० ॥

गच्छतस्तिष्ठतो वापि दिशि यस्यां व्यवस्थितः ।
विरौति शकुनो वाच्यस्तद्दिग्जेन समागमः ॥ ३१ ॥

भिन्नभैरवदीनार्तपरुषाक्षमजर्जराः ।
स्वरा नेष्टाः शुभाः शान्ता हृष्टप्रकृतिपूरिताः ॥ ३२ ॥

शिवाश्यामारलाछुच्छुपिङ्गलागृहगोधिकाः ।
सूकरी परपुष्टा च पुन्नामानश्च वामतः ॥ ३३ ॥

स्त्रीसंज्ञा भासभषककपिश्रीकर्णच्छित्कराः ।
शिखिश्रीकण्ठपिप्पीकारुरुश्येनाश्च दक्षिणाः ॥ ३४ ॥

क्ष्वेडास्फोटितपुण्याहगीतशंखाम्बुनिःस्वनाः ।
सतूर्याध्ययनाः पुंवत् स्त्रीवदन्या गिरः शुभाः ॥ ३५ ॥

Testimonia :

33 cited by Govinda on *MC* 11, 105 34 = *TY* 9, 20 and cited by Govinda on *MC* 11, 106.

Apparatus :

28a वृषलातक° M 28c °क्षणीका च B 28d °काराः परस्ततः M 30b श्रेष्ठश्चरो M 31d °द्दिकूस्थेन M 32a °दानार्ति° B 32b परुषक्षामजर्जराः B, परुषाः क्षामन्धर्जराः M 32c-d नेष्टास्स्वनाश्शुभाश्शान्ताश्शिष्टाः प्रकृतिपूजिताः M 33a °शामा° B, °श्यमा° M °छुछु° B, °चुच्छु° M 34a °ज्ञाश्चाष° Govinda 34b °पिजलाप्लवकम्बुकित्सका *TY*, °कपिश्रीकण्ठवित्कराः M, °पिकश्रीकर्णछिक्कराः Govinda °कपिश्रीकर्णीछत्कराः B 34c °कष्ठपयीक° *TY*, °कण्ठपिप्याक° B, °कण्ठविप्फाक° M, °कण्ठपिकक° Govinda 34d दक्षिणे M, दक्षिणाङ्ग × *TY* 35a क्ष्वेलास्फोटन-वादित्र° M 35c तुर्याध्ययनाः M 35d °दन्य M

ग्राम्यौ मध्यमषड्जौ तु गान्धारश्चेति शोभनाः ।
षड्जौमध्यमगान्धारा ऋषभश्च स्वरा हिताः ॥ ३६ ॥

रुतकीर्तनदृष्टेषु भारद्वाजाजबर्हिणः ।
धन्यौ नकुलचाषौ च सरटः पापदोऽग्रतः ॥ ३७ ॥

जाहकाहिशशक्रोडगोधानां कीर्तनं शुभम् ।
रुतसंदर्शनं नेष्टं प्रतीपं वानरर्क्षयोः ॥ ३८ ॥

ओजाः प्रदक्षिणं शस्ता मृगाः सनकुलाण्डजाः ।
चाषं सनकुलं वामं भृगुराहापराह्नतः ॥ ३९ ॥

छित्करः कूटपूरी च पिरिली(?) चाह्नि दक्षिणाः ।
अपसव्यं सदा शस्ता दंष्ट्रिणः सविलेशयाः ॥ ४० ॥

श्रेष्ठे हयसिते प्राच्यां शवमांसे च दक्षिणे ।
कन्दकादधिनी पश्चादुदग्गा विप्रसाधवः ॥ ४१ ॥

जालश्वचरणौ नेष्टौ प्राग्याम्ये शस्त्रघातकौ ।
पश्चादासवषण्डौ च खलासनहलान्युदक् ॥ ४२ ॥

कर्मसङ्गमयुद्धेषु प्रवेशे नष्टमार्गणे ।
यानव्यत्यस्तगा ग्राह्या विशेषश्चात्र कथ्यते ॥ ४३ ॥

दिवा प्रस्थानवद्ग्राह्याः कुरङ्गरुरुवानराः ।
अह्नस्तु प्रथमे भागे चाषवञ्जुलकुक्कुटाः ॥ ४४ ॥

Testimonia:

39a-b cited by Govinda on *MC* 11, 107

Apparatus:

36a ग्रामौ मध्यमषट्कौ च M 36c षट्ज(च)° M 36c-d गान्धाररुष-भाश्च B 37c धन्येन कुलचाष्टौ M 38c चुतं B 39a प्रदक्षिणाश्शस्ताM 39b मृगाश्वनकुला° Govinda 39c चाषस्सनकुलो वामे M 39d °पराह्नतः B 40a चीत्करः कूटपूती M 40b विरिली चाग्नि दक्षिणे M 40c अपसव्यास्सदा M 40d दंष्ट्रिणः]..........M 41b शिवमांसौ M 41c कन्यका° M 42a जालश्व-रणौ M 42b शस्त्रि° M 43c यानव्यस्तगता B 44c अह्नश्च M 44d °वंचुल° M

पश्चिमे शर्वरीभागे नप्तृकोलूकपिङ्गलाः ।
सर्व एव विपर्यस्था ग्राह्याः सार्थेषु योषिताम् ॥ ४५ ॥

नृपसन्दर्शने ग्राह्याः प्रवेशेऽपि प्रयाणवत् ।
गिर्यरण्यप्रवेशेषु नदीनां चावगाहने ॥ ४६ ॥

वामदक्षिणगौ शस्तौ यौ तु तावग्रपृष्ठगौ ।
क्रियादीप्तौ विनाशाय यातुः परिघसंज्ञितौ ॥ ४७ ॥

तावेव तु यथाभागं प्रशान्तरुतचेष्टितौ ।
शकुनौ शकुनद्वारसंज्ञितावर्थसिद्धये ॥ ४८ ॥

केचित्तु शकुनद्वारमिच्छन्त्युभयतः स्थितैः ।
शकुनैरेकजातीयैः शान्तचेष्टाविराविभिः ॥ ४९ ॥

विसर्जयति यद्येक एकश्च प्रतिषेधति ।
सविरोधोऽशुभो यातुर्ग्राह्यो वा बलवत्तरः ॥ ५० ॥

पूर्वं प्रावेशिको भूत्वा पुनः प्रास्थानिको भवेत् ।
सुखेन सिद्धिमाचष्टे प्रवेशे तद्विपर्ययात् ॥ ५१ ॥

विसृज्य शकुनःपूर्वं स एव निरुणद्धि चेत् ।
प्राह यातुररेर्मृत्युं समरं रोगमेव च ॥ ५२ ॥

अपसव्यास्तु शकुना दीप्ता भयनिवेदिनः ।
आरम्भे शकुनो दीप्तो वृषान्ते तद्भयंकरः ॥ ५३ ॥

तिथिवाय्वर्कभस्थानचेष्टादीप्ता यथाक्रमम् ।
धनसैन्यबलाङ्गेष्टकर्मणां स्युर्भयंकराः ॥ ५४ ॥

Apparatus

45a शर्वरीपश्चिमे भागे B 45d योषित् M 46b ऽपि] च M 46c °प्रवेशे च M 47d °संस्थितौ M 48e पापेव M 48d °संस्थिताव° M 49a-b °द्वारं वदन्त्युभयसंस्थितैः M 49d °विदोधिभिः B 51c सखेन M 52d चमरं B 53d विषांतिस्तद्भ° B 54a °वारर्क्षभ° M 54c °सैंद° B

जीमूतध्वनिदीप्तेषु भयं भवति मारुतात् ।
उभयोः सन्ध्ययोर्दीप्ताः शस्त्रोद्भवभयंकराः ॥ ५५ ॥

चिताकेशकपालेषु मृत्युबन्धवधप्रदाः ।
कण्टकीकाष्ठभस्मस्थाः कलहायासदुःखदाः ॥ ५६ ॥

अप्रसिद्धिं भयं वापि निःसाराश्मव्यवस्थिताः ।
कुर्वन्ति शकुना दीप्ताः शान्ता याप्यफलास्तु ते ॥ ५७ ॥

आसिद्धिसिद्धिदौ ज्ञेयौ निर्हाराहारकारिणौ ।
स्थानात्क्रोशन् व्रजेद्यात्रां शंसते त्वन्यथागमम् ॥ ५८ ॥

कलहः स्वरदीप्तेषु स्थानदीप्तेषु विग्रहः ।
उच्चमादौ ध्वनिं कृत्वा नीचं पश्चाच्च दोषकृत् ॥ ५९ ॥

एकस्थाने रुवन् दीप्तः सप्ताहाद्ग्रामनाशकृत् ।
पुरदेशनृपाणां च ऋत्वर्धायनवत्सरात् ॥ ६० ॥

सर्वे दुर्भिक्षकर्तारः स्वजातिपिशिताशनाः ।
सर्पमूषिकमार्जारपृथुरोमविवर्जिताः ॥ ६१ ॥

परयोनिषु गच्छन्तो मैथुनं देशनाशनाः ।
अन्यत्र वेशरोत्पत्तेर्नृणां वाजातिमैथुनात् ॥ ६२ ॥

बन्धघातवधानि स्युः पादोरुमस्तकाभिगैः ।
अप्सस्यपिशितान्नाद्यैर्वर्गमोषक्षतग्रहाः ॥ ६३ ॥

इष्टं वा गोरसान्नं वा भारद्वाजस्य दर्शने ।
चाषस्य पूर्णवक्त्रस्य महान् लाभः प्रदक्षिणे ॥ ६४ ॥

Apparatus

56a चिति° M 56b मृत्युबन्धुभयप्रदाः M 57a चापि M 57d याप्य-कला° B 58b °कांक्षिणौ M 58c स्थानाद्वासन् B 58c-d व्रजन यात्रां सते त्व° M 59a कलहिः B 59c स्वरं M 59d मोषकृत् B 60b °द्ग्रामघातकृत् M 62d नृपाणामतमैथुनात् M 63a °घातभयानि B 63b पादोरो° B M °मस्तकाहतैः M 63c अयुपपिशि° M 63d °वैपमोषक्षतग्रहाः M 64c चाबस्य पूर्व° M

वामदक्षिणगः श्रेष्ठः पुरस्ताच्च कपिंजलः ।
तित्तिरिः पृष्ठतः श्रेष्ठः सर्वत्रान्यत्र गर्हितः ॥ ६५ ॥

अनुलोमो वृषो नर्दन् धन्यो गौर्महिषस्तथा ।
गमनप्रतिषेधाय खरः प्रत्युरसि स्थितः ॥ ६६ ॥

उलूकी वामतः क्षेम्या दक्षिणेन च कोकिला ।
शर्करिश्च (?) मयूरश्च शस्यते दक्षिणे सदा ॥ ६७ ॥

वृकाः शृगालाः शार्दूला विडाला गर्दभाः शुनः ।
वामतोऽर्थकरा ज्ञेयाः कुरङ्गा दक्षिणेन च ॥ ६८ ॥

रिक्तकुम्भोऽनुकूलश्च शस्तोऽम्भोर्थी यियासतः ।
चौर्यविद्यावणिग्वित्तमुद्यतानां विशेषतः ॥ ६९ ॥

(इति) बृहद्यात्रायां शकुनशुभाशुभाध्यायस्त्रयोविंशः ॥ ४५० ॥

पृष्ठतः पूजिता शान्ता शिवा मांसास्थिवर्जिता ।
क्रूरशब्दातिदीप्ता च क्रूरकर्मणि पूजिता ॥ १ ॥

पूर्वोदीच्योः शिवा शस्ता शान्ता सर्वत्र पूजिता ।
धूमिताभिमुखी हन्ति स्वरदीप्ता दिगीश्वरान् ॥ २ ॥

Apparatus:

the order in M is : 65c-d, 66, and 65a-b 65a °दक्षिणतः M 65d सर्वत्राप्यनुलोमगः M 66a अनुलोपुषो नर्दं M, लोमो वृक्षो गन्तु° M² 66d परात्प्रत्युरसि M, परे प्रत्युरसि M² The order of verses after 66 in M is: 25, 11-16; 25, 4-10 ; 25, 1-3; 23, 64; and 23, 66-69. 67b गमनेन M कोकिलः M 67c कर्करीश्च M 68b विलाला M शशाः M 69a ऽनुलोमश्च M 69b ऽम्भोर्थमिति यासतः M 69c-d चौर्यवाणिज्यविद्यार्थाभ्युद्यतानां M col. om. M

In M 24 follows 23, 69. 1a शस्ता M 1c °शब्दाश्च दीप्ताश्च M

[राजा कुमारो नेता च दूतः श्रेष्ठी चरो द्विजः ।
गजाध्यक्षश्च पूर्वाद्याः क्षत्रियाद्याश्चतुर्दिशम् ॥ ३ ॥]
सर्वदिक्ष्वशुभा दीप्ता विशेषेणाह्न्यशोभना ।
पुरे सैन्येऽपसव्या च कष्टा पूर्वोन्मुखा शिवा ॥ ४ ॥
याहीत्यग्निभयं शास्ति टाटेति मृतिचोदिता ।
धिग्धिक् दुष्कृतमाचष्टे सज्वाला देशनाशिनी ॥ ५ ॥
नैव दारुणतामेके स्वज्वालायाः प्रचक्षते ।
अर्काद्यनलवत्तस्या वक्त्राज्ज्वाला स्वभावतः ॥ ६ ॥
अन्यप्रतिरुता याम्या सा बन्धवधशंसिनी ।
वारुण्याभिरुता सैव शंसते सलिले मृतिम् ॥ ७ ॥
अक्षोभ्यश्रवणं चेष्टं धनप्राप्तिः प्रियागमः ।
क्षोभात् प्रधानभेदश्च वाहनानामसम्पदः ॥ ८ ॥
फलमा सप्तमादेतदग्राह्यं परतो रुते ।
याम्यायां तद्विपर्यस्तं फलं षट्पञ्चमाद्रुते ॥ ९ ॥
या रोमांचं मनुष्याणां शकृन्मूत्रं च वाजिनाम् ।
रावात् त्रासं च जनयेत् सा शिवा न शिवप्रदा ॥ १० ॥
मौनं गता प्रतिरुते नरद्विरदवाजिभिः ।
या शिवा सा शिवं सैन्ये पुरे वा संप्रयच्छति ॥ ११ ॥
(इति) बृहद्यात्रायां शिवारुतनामाध्यायश्चतुर्विंशः ॥ ४६१ ॥

Testimonia :

3 equals 23, 30

3 om. M 4b °णाह्नाशो° B, °णाह्यशो° M 4d सर्पोन्मुखा B 5b टेटेति M मृतवेदिका M 6b सज्वालायां M 6c अर्काग्न्यनिलव° M 6c-d °त्तस्माद्वक्त्वां B, °त्तस्या वक्त्रं M 6d लाला M 7b सोत्बन्धमृत° M, सा बन्धुवध° B 7c आरुण्यनिरुता M 8a अयोभ्य° B, अक्षोभ° M 8c क्षोभः M 8d °नानां च सम्पदः M 9a-b सप्तमादेदग्राह्यं M 9b रुतं B, रुतः M 9d वदपंचमा° B °हते B M 10a यो B M 10c च om. M

शस्तो नीडस्तु वैशाखे पादपे निरुपद्रवे ।
देशोत्थानं तु वल्मीकचैत्यधान्यगृहादिषु ॥ १ ॥

काकानां श्रावणे द्वित्रिचतुःशावाः शुभावहाः ।
गैरिकश्वेतचित्राश्च वर्णाश्चौराग्निमृत्युदाः ॥ २ ॥

अण्डावकिरणे ध्वांक्षा दुर्भिक्षमरकावुभौ ।
शावानां विकलत्वे वा निःशावत्वे कृताथवा ॥ ३ ॥

हरेदुपनयेद्वापि यद्द्रव्यं वायसोऽग्रतः ।
तन्नाशलब्धौ विज्ञेयौ हेमपीते विनिर्दिशेत् ॥ ४ ॥

रक्तद्रव्यं प्रदग्धं वा न्यसन् गेहेऽग्निदः स्मृतः ।
तृणभस्मास्थिकेशांश्च शयने स्वामिमृत्युदः ॥ ५ ॥

पुरसैन्योपरि व्योम्नि व्याकुलैरनिलाद्भयम् ।
सव्यमण्डलगैः स्वार्थमपसव्यैः परोद्भवम् ॥ ६ ॥

अकार्यसहितैर्भेदो रोधश्चक्राकृतिस्थितैः ।
वर्गतश्चाभिघातः स्याद्रिपुवृद्धिश्च निर्भयैः ॥ ७ ॥

Testimonia

1 cited by Utpala on *BS* 94, 5 2-3 cited by Utpala on *BS* 94, 7 4 cited by Utpala on *BS* 94, 15 5a-b cited by Utpala on *BS* 94, 18 5c-d cited by Utpala on *BS* 94, 12 6 cited by Utpala on *BS* 94, 10 7 cited by Utpala on *BS* 94, 8

Apparatus

In M the order is 25, 11-16 (25, 11 follows 23, 66); 25, 4-10; 25, 1-3 1a नीलस्तु M 1b °पद्रवे om. B 1c देशोत्सादस्तु B 1d °ग्रहादिषु B, °शहादिषु M 2a कालानां B 2c गेरकश्वेतचित्राश्च B, घोरकश्वतचित्राश्च M, चोरचित्रकश्वेताश्च Utpala 3a अस्मावकिरणे घ्वोक्षा B, अण्डन्धावकिरण ध्वांक्षो M 3b °मरणावुभौ M 3d निःसावैकाण्डताथवा B 4c तत्प्राप्तिनाशौ B 4d हेमपात्रे B 5a च Utpala 5b न्यसन्] धान्यंUtpala 5c °सस्थिकेणांश्च B 6c स्वोत्थ° Utpala 6d पराद्भयम् M Utpala 7a °संहति° B, °संहत° Utpala 7b क्रोध° M °स्थितिः B 7c वहुतः स्वा° B, वर्गगैश्चा° Utpala 7d निर्दयैः M

उपानच्छत्रयानाङ्गशस्त्रच्छायावकुट्टने ।
मृत्युं तत्स्वामिनो ब्रूयात् पूजा स्यात् तत्प्रपूजने ॥ ८ ॥

काष्ठरज्ज्वस्थिनि:सारकेशकण्टकभृद्रुवन् ।
व्यालाहिव्याधिशस्त्राग्नितस्करेभ्यो भयङ्करः ॥ ९ ॥

युद्धं सेनाङ्गसंस्थेषु मोषकृत् स्वावलेखने ।
चरन्निशि विनाशाय दुर्भिक्षं धान्यमोषकृत् ॥ १० ॥

वामपार्श्वस्थितः श्रेष्ठो दक्षिणाद्वापि वामगः ।
ध्वांक्षः पार्श्वद्वयेनापि शस्तो यात्रानुलोमगः ॥ ११ ॥

यातुः कर्णसमो ध्वांक्षः क्षेम्यो नार्थप्रसादकः ।
वामदक्षिणगो नेष्टो वा समानः प्रतीपगः ॥ १२ ॥

विरुवन् चाग्रतः पक्षे धून्वन् ध्वांक्षो भयप्रदः ।
प्रत्युरस्युपसर्पन् च संस्पर्शन् च तथा भवेत् ॥ १३ ॥

एकपादो चलत्पक्षः काको ऽवस्कन्दखेटकः ।
वधबन्धकरो वाशन् खरसूकरपृष्ठगः ॥ १४ ॥

Testimonia

8 cited by Utpala on *BS* 94, 14 9 cited by Utpala on *BS* 94, 40 10 cited by Utpala on *BS* 94, 11 11a-b cited by Utpala on *BS* 94, 29 12a-b cited by Utpala on *BS* 94, 25 14c-15 cited by Utpala on *BS* 94, 47

Apparatus

8a उपानदछत्र° B, उपानच्छस्त्र° Utpala °यात्रा° M 8b °च्छत्र° Utpala °वकूतने B, °वकुट्टनैः M 9a °रज्जुस्थि° B, °रज्ज्वग्नि° M 9b °कन्दक° M, °कण्टकि° Utpala °भूद्रवन् B, °भृत् क्वणन् M 9c यानाहि° B 10a °संस्थे तु M 10B °कस्त्वावलेखने M, °कृत् स्वविलेखने Utpala 10d यान्य° M, चान्न° Utpala 11a °स्थितिाद्याति Utpala 12b क्षेमे नार्थप्रसाधकः Utpala 12c निष्ठे B 12d पवमानः M 13a ब्रुवं चा° B, विरूपंश्चा° M 13b ध्वन्वन B 13c °रसुप° B, °रसि उप° M 13c-d °सर्पंश्च संस्पर्शंश्च B M 14b कालो B ऽवस्कन्दचोदकः M 14c वासन् B, क्रोशन् Utpala 14d परसूकर° M

पङ्कदिग्धशरीरस्य वराहस्योपरि स्थितः ।
वायसः शस्यते यातुस्तूष्णीभूतो रुवन्नपि ॥ १५ ॥

क्षीरवृक्षाजमहिषीगोस्थितो गोरसप्रदः ।
अन्नदः पर्णविच्छेदी पानदो जलकुट्टनात् ॥ १६ ॥

(इति) बृहद्यात्रायां वायसेङ्गिताध्यायः पंचविंशः ॥

नृहयातपवारणेभशस्त्रध्वजदेहानवमूत्रयन् जयाय ।
सभयो विचरन् विना निमित्तं न शुभश्चाभिमुखो भषन् लिखन् गाम् ॥१॥

उच्चैर्भषणं समागतानां दीनं वाभिरुतं रविं निरीक्ष्य ।
संघरदनजृम्भणे च नेष्टे प्रस्थानेषु तथा विधूननं च ॥ २ ॥

पूर्णास्यत्वं घ्रायकत्वं च यातुः प्रादक्षिण्यं मैथुनं चानुलोमम् ।
यात्राकाले सारमेयस्य शस्तं पद्भ्यां मूर्ध्नः स्वस्य कण्डूयनं च ॥ ३ ॥

(इति) बृहद्यात्रायां श्वेङ्गिताध्यायः षड्विंशः ॥

सिद्धार्थकादर्शपयोंजनानि बद्धैकपश्वामिषपूर्णकुम्भाः ।
उष्णीषभृङ्गारनृवर्द्धमानपुंयानवीणातपवारणानि ॥ १ ॥

Apparatus

15c-d यातुतुष्णी° B, यातूष्णीं° M 16c पत्रछेदी B 16d पानभो M °कूटनात् M col. om. M

In M 26, 1-3 fallow 24, 11 1a नरहया° M 1b °देहानमूत्रयन् M 1c चीरन् M 1d शुभ in Marg. B शुभं चा° M भसन् B लिखन् om. M गं B 2a उच्चरभषण B, उच्चैर्भषिणं M 2c संघरदनं विजृम्भणं B, संछर्दनजृम्भणे M नेष्टं B 3a ग्राहयकत्वं M 3b प्रदक्षिण्यं B चानलाभ्यं B, चानुलोम्यं M 3d मुर्द्धना B

Testimonia

1-6=*TY* 9, 11-16 =*YY* 17, 10-15 1a cited by Utpala on *BS* 42, 12

Apparatus

In B the order is 6; 1-5 In M chapter 27 follows 28, 1 1a °दश° in marg. B °पयोमृंगां° B, °मयां° Utpala 1b विध्यैक° B 1c °ण° B, °ञु° M

दधिमधुघृतरोचनाकुमार्यो ध्वजकनकाम्बुजभद्रपीठशंखाः ।
सितवृषकुसुमाम्बराणि मीना द्विजगणकाप्तजनाश्च चारुवेषाः ॥ २ ॥

ज्वलितशिखिफलाक्षतेक्षुभक्ष्या द्विरदमृदङ्कुशचामरायुधानि ।
मरकतकुरुविन्दपद्मरागस्फटिकमणिप्रमुखाश्च रत्नभेदाः ॥ ३ ॥

स्वयमथ रचितान्ययत्नतो वा यदि कथितानि भवन्ति मङ्गलानि ।
स जयति सकलां ततो धरित्रीं ग्रहणद्दगालभनश्रुतैरुपास्य ॥ ४ ॥

कार्पासौषधकृष्णधान्यलवणक्लीवास्थितैलावसाः
पङ्काङ्गारगुडाहिचर्मशकृतः क्लेशाय सव्याधिताः ।
वातोन्मत्तजडेन्धनं तृणतुषक्षुत्क्षामतक्रारयो
मुण्डाभ्यक्तविमुक्तकेशपतिताः काषायिनश्चाशुभाः ॥ ५ ॥

पटुपटहमृदङ्गशंखभेरीपणवरवं सपताकतोरणाग्रम् ।
प्रचुरकुसुमतोयशान्तरेणुं सुरभिसुवेषजनं व्रजेच्च मार्गम् ॥ ६ ॥

इति बृहद्यात्रायां मङ्गलामङ्गलनामाध्यायः सप्तविंशः ॥

Testimonia

4 cited by Govinda on *MC* 11, 100-101 5 cited by Govinda on *MC* 11, 102-103

Apparatus

2c °वृक्षकुसुमाम्ब° B निना B, मीन° M °गणिका° *TY*, *YY*, °कुसुमा° M 3a °शिखिशिक्षाक्षितेक्षु° M °भक्षा *TY* 3c °पद्मरागाः B, °पलाश° M 4d °दुर्ग° B, °गदा° M, °दृशां Govinda श्रुतिपाठतो यथाह Govinda 5a °क्षीवा° M °तैलावशाः B, °तैलम्बसा M, *TY*, *YY*, °तालानलं Govinda 5b सर्प° Govinda °गराहि° Govinda °प्रवृताः Govida केशारि° Govinda 5c वान्तोन्नत° B, भ्रान्तो मन्त° M, मत्तोन्मत्त° *TY* °जलेन्धनोपलतुषकृत्° M, °जडीकृतान्धबधिरक्षुत्° *TY*, °जडान्धकास्तृणतुषक्षुत्° Govinda °श्याम° B 6a °हसंखभेरीमृंग्रं° B 6b °भौर्णाग्रे B, °तोरणाद्यः M 6d भजेच्च M, *TY* col. इति om, B इति महायात्रायां मङ्गलाध्याय एकविंशः M

ध्वजातपत्रायुधसन्निपात: क्षितौ प्रयाणे यदि मानवानाम् ।
उत्तिष्ठतो वाम्बरमेति सङ्गं पतेच्च वा तन्नृपतेः क्षयाय ॥ १ ॥

दद्रुप्रतिश्यामविचर्चिकाः स्युः कर्णाक्षिरोगा पिटकोद्भवो वा ।
प्रायो बले नेतरि वा नृपे वा जानीत राज्ञो भयकारणं तत् ॥ २ ॥

उत्तानशय्यासनवातसर्गनिष्ठ्यूतदुर्दर्शनकासितानि ।
नेष्टानि शब्दाश्च तथैव यातुरागच्छतिष्ठप्रविशस्थिराद्याः ॥ ३ ॥

कार्ये तु मूलशकुने ऽन्तरजे तदह्नि
विद्यात् फलं नियतमेवमिमे विचिन्त्याः ।
प्रारम्भयानसमये तु तथा प्रवेशे
ग्राह्यं क्षुतं न शुभदं क्वचिदप्युशन्ति ॥ ४ ॥

क्रोशादूर्ध्वं शकुनविरुतं निष्फलं प्राहुरेके
तत्रानिष्टे प्रथमशकुने मानयेत् पंच षड्वा ।
प्राणायामान्नृपतिरशुभे षोडशैवं द्वितीये
प्रत्यागच्छेत् स्वभवनमतो यद्यनिष्टस्तृतीयः ॥ ५ ॥

Testimonia

1 cited by Govinda on *MC* 11, 102-103. 1 and 3 cited by Viṣṇuśarman on *VM* 12, 20 4-5=*YY* 18, 29-30

Apparatus

In M 1 Precedes 27, 1; 2 follows 29, 2; and 3-6 follow 26, 3
1a °पत्रायत° B, °पत्रादिक° M 1b प्रयातो B 1c चाम्बर° Viṣṇuśarman, वायुध° Govinda 1d पतेत्तथा M, पतेत वा Govinda पाताच्च पातं नृपते° Viṣṇuśarman °भयाय Govinda Viṣṇuśarman 3a °पातसर्ग° Viṣṇuśarman 3b °निष्टतदुर्दशन° B, °निष्ठ्युतद्दर्शन° M °काश्यतानि B, °तासितानि M °वाशितानि Viṣṇuśarman 3c निष्टानि B निष्टेन्निशाश्च M 3d °रागश्च Viṣṇuśarman °वीराद्याः M 4a मूले कुशनेऽन्तर्ये B 4b दिव्यात् B 4c समयेषु BM 4d ग्राम्यं M न तु शुभं त्विदव्युशन्ति M 5a क्रोशादर्द्धं शकुनवितं M 5c षेड्शीव B, षोडशाथो M 5d प्रत्यागच्छन् *YY*

चक्रे वराहमिहिरः शकुनोपदेशमुद्देशतो मुनिमतान्यवलोक्य सम्यक् ।
यद्ग्रन्थविस्तरभयादविजानतो वा नोक्तं तदन्यकथितादपि चिन्तनीयम्॥६॥

इति बृहद्यात्रायां ध्वजातपत्रादिशकुननामाध्यायोऽष्टविंशः ॥

स्निग्धा स्थिरा सुरभिगुल्मलता सुगन्धा
शस्ता प्रदक्षिणजला च निवासभूमिः ।
नेष्टा विपर्ययगुणा कचशर्करास्थि-
वल्मीककण्टकविभीतकसङ्कुला च ॥ १ ॥

गत्वालयं सुरगुरुद्विजसाधुमित्र-
तीर्थेतिहासजयपुण्यकथासु तिष्ठेत् ।
हत्वा पशुं रिपुगृहाकृतमुद्यमे च
प्राश्याथवान्नमयमस्य विधाय रूपम् ॥ २ ॥

एकत्राध्युषितस्यात्रिगौतमच्यवना जगुः ।
यात्रां त्रिपञ्चसप्ताहात् पुनर्भद्रेण योजयेत् ॥ ३ ॥

तच्चायुक्तमिति प्राहुर्होराशास्त्रविदो जनाः ।
वांछितार्थफलावाप्तौ यात्रा परिसमाप्यते ॥ ४ ॥

(इति) बृहद्यात्रायां निवेशलक्षणाध्याय एकोनत्रिंशः ॥

Testimonia

1. cited by Śivaraja on P. 209 3 cited by Govinda on *MO* 11, 95

Apparatus

6c °दभिजानतो M col. इति om. B
इति महायात्रायां शकुनाध्यायः त्रयोविंशतिः M

In M the order is: 31, 3; 29, 1-2; 28, 2; and 29, 3-4 1b प्रदक्षणजभा B 1c कचशर्कास्थि° B 1d °कण्डक° B, °कीटक° Śivarāja 2c पशून् B °ग्रहा° BM 2d व्रात्या° M 3a °त्रा° om. M °धु (in marg. धि B²) शित //// (in marg. स्या B²) त्रि B 3a-b °तस्य जगुर्यात्रामत्रात्रि° गौतमच्यवनाः Govinda 3c त्रि (in marg. पंच B²) सप्ताहा B, पंचत्रिसप्ताहात् M 3c-d पंचत्रिसप्तरात्राद्भूयाद्भद्रेण संयोज्यं Govinda 3d °द्रेण भूपतेः योजयेत् M 4b °होंडा° B col, om. M

अक्षेपशीलः परुषाभिधायी विरक्तभृत्यः परदारगामी ।
लुब्धोऽसहायो व्यसनी कृतघ्नः स्थितिप्रभेत्ता करशीर्णराष्ट्रः १ ॥

विस्रम्भहा क्रोधवशो नृशंसः क्षुद्रः प्रमादी न बहुश्रुतश्च ।
दिव्यान्तरिक्षक्षितिजैर्विकारैर्निपीडितो यः स तु दैवहीनः ॥ २ ॥

अतो विपर्यस्तगुणेन राज्ञा तादृग्विधोऽरिस्त्वभियुक्तमात्रः ।
तरुर्घुनैर्जग्ध इवात्तवीर्यो महानपि क्षिप्रमुपैति भङ्गम् ॥ ३ ॥

इति बृहद्यात्रायामभियोज्यलक्षणाध्यायस्त्रिंशः ॥

विद्विष्टप्रवरनरप्रतापहीना निःशौचामृतवरवारणाश्च योधाः ।
सोत्पातप्रकृतिविपर्ययानुयाता शोकार्ता रिपुवशमाशु याति सेना ॥ १ ॥

संग्रामे वयममरद्विजप्रसादाज्ज्येष्यामो रिपुबलमाश्वसंशयेन ।
यस्यैवं भवति बले जनप्रवादः सोऽल्पोऽपि प्रचुरबलं रिपुं निहन्ति ॥२॥

Testimonia :

1-3=*TY* 9, 24-26 and cited by Śivarāja on P. 206

1-2=*TY* 9, 27-28

Apparatus :

In M 30, 1-3 repeated after the two extra verses that follow 32, 18; the repeat here called M[2] 1a पुरुषाविधायी B, परुषाभिभाषी Śivarāja 1b परापवादी Śivarāja 1c लब्धो B 2a विस्रब्धहा M[2] लेधवशो B, क्रोधपरो MM[2] Śivarāja 2d यश्च स MM[2] Śivarāja दैव हि M[2] 3 om. M 3a अदैवलक्ष्मान्यगुणेन Śivarāja 3b °स्त्वनुयुक्तमात्रः Śivarāja 3c तरुर्गजै M[2] °र्जग्ध om. in lac. M[2] इवात्तकार्यो *TY*, इवाल्पवीर्यो Śivarāja. after 3 Śivarāja adds :

यस्मिन् देशे पुरे गेहे त्रिविधोत्पातपूर्वकम् ।
दृश्यते तत्र भङ्गः स्यादित्युक्तं ब्रह्मयामले ॥

col. om. M. इति om. B इति महायात्रायां प्रास्थानिकं नाम द्वाविंशोऽध्यायः M[2]

1a तद्विष्ट° *TY* 1b निःशौर्या वरवारणाश्वयोधमुख्याः *TY* 1d रिपुबल° *TY* यातु B 2c °प्रवाहः M 2d सोऽन्यो B, स्वल्पो *TY* प्रवर° *TY* परं निहन्ति M, निहन्ति राजा *TY* 3 inserted before 29, 1 in M,

प्रोत्क्षिप्तक्षुपपांशुपत्रविहगच्छत्रध्वजाग्रान्तकृद्
दुर्गन्धिः करिदानशेषजनकः सावर्त्तलोष्टोत्करः ।
यातुर्वायुरनिष्टदः शुभकरो यात्रानुलोमोद्यमः
प्रह्लादी सुरभिप्रदक्षिणगतिः स्वादुश्च सिद्धिप्रदः ॥ ३ ॥

पृथुघनमनुलोमं स्निग्धमम्भोदवृन्दं तरुनगनगरेष्टद्रव्यसत्वानुकारि ।
जयदमुभयपार्श्वाधिष्ठितं पृष्ठतो वा न शुभकरमतोऽन्यद्यानकाले नृभर्तुः ॥४॥

निन्दितसत्त्वपिशाचविचित्राः पिशितमृगाकृतयः परुषाश्च ।
वज्रमुचः क्षतजाश्ममुचो वा बलभयमाशु जनाः कथयन्ति ॥ ५ ॥

भृशं क्षरन्तो रुधिरारुणा वा सशक्रचापा खररूक्षनादाः ।
रणोपयोज्याकृतिचित्ररूपा रणाय दृष्टा गगनेऽम्बुवाहाः ॥ ६ ॥

सप्ताहान्तर्बलभयकरी वृष्टिरन्यर्तुजाता
केचिद्यात्रामसितजलदैः प्रोत्थितां पूजयन्ति ।
चित्राभ्रायां बलपतिवधो रुक् च पीताम्बुदायां
क्षुच्चोष्णायां भवति न चिरादम्बुदायां विनाशः ॥ ७ ॥

वाहनानि सव्यगो हन्ति योषितोऽन्यथा ।
पंजराकृतिस्थितः सर्वतो बलेश्वरम् ॥ ८ ॥

चापमैन्द्रमनुलोममखण्डं प्रोज्ज्वलं बहुलमायतमिष्टम् ।
स्फूर्जनं सलिलकुम्भनिषेकं क्षोभितार्णवसमं विजयाय ॥ ९ ॥

Testimonia

6 and 7 cited by Govinda on *MC* 11, 98

Apparatus

3a प्रोत्क्षेपित° B °वासुविहगश्शक° M °ग्रान्तक° M 3b °जनन M 3c यात्रानुगोल्वोद्यमः B 3d पूर्वादिः M वृद्धिप्रदः M 4a °म्भोऽदृंदं B 4b °नगरन गेष्ट° B 4c जयकृदुभयपार्श्वे वेष्ठितं M 5a निंद्यति B 5b °भगाकृ° B 5d जनभय° M 6a शरंतो B वा om. M, °भा: Govinda 6d गमने B Govinda 7a दुष्टरण्यर्तु° B 7b प्रोद्यतां B, संयुतां Govinda 7c चित्राब्दायां M बलवति° M, बलमति° Govinda रुक्स° Govinda 7d शुक्राब्दायां न भवति Govinda च नाशः M, च नात्र Govinda 8d नलेश्वरं B 9c स्फूर्जितं M शरल° B 9d °समं om. B

तन्वी प्रलम्बा विजयाय दीर्घा तडिद्घनस्फूर्जथुवर्जिता च ।
शस्ताशनिश्चाप्यसमीपजातः प्रदक्षिणेनाप्स्यति पातशब्दः ॥ १० ॥

लग्नेऽर्केन्दू निघ्नती शस्ति पौरानुल्का हन्याद्यातुपौरान् ग्रहाश्च ।
यातुः शस्ता सम्भृता वा ध्रुवर्क्षे नेष्टातोऽन्या धूमिनी श्यावरक्ता ॥११॥

हन्यान्नृपपौरराष्ट्रिकान् भृत्याम्भोरुहतस्करान् द्विजांश्च ।
वेला क्रमशो दिनादितः काष्ठायां च स यत्र भूस्वनश्च ॥ १२ ॥

शस्ता शान्तद्विजमृगघुष्टा सन्ध्या स्निग्धा मृदुषवना च ।
पांशुध्वस्ता जनपदनाशं धत्ते रूक्षा रुधिरनिभा वा ॥ १३ ॥

(इति) बृहद्यात्रायां सेनावातवृष्ट्युल्काभूगर्जितसन्ध्यालक्षणनामाध्याय एकत्रिंशः ॥

परिवेषोऽर्कशशिनोः शलुपक्षग्रहैः सह ।
स्निग्धोऽखण्डश्च जयदः पापदो बहुमण्डलः ॥ १ ॥

प्रतिलोमोऽतिबहुलो नेष्ट इष्टः प्रदक्षिणः ।
नीहारः पांशुपातश्च हितः स्निग्धः प्रदक्षिणः ॥ २ ॥

गन्धर्वनगरं हन्ति प्राक्प्रभृत्यवनीश्वरम् ।
बलेशं युवराजं च पुरोहितमिति क्रमात् ॥ ३ ॥

सिताद्यं ब्राह्मणादींश्च विदिक्षु वर्णसङ्करान् ।
प्रदक्षिणं तु यात्रायां जयदं नेष्टमन्यथा ॥ ४ ॥

Apparatus

10a प्र° om. M विलय B 10b तदि° M °स्फूर्जतवर्यतानि च B 10d नाप्यति B पातिशब्दः B 11a निघ्नन्ति B शस्ति] हन्ति M 11b °पौरा B, °पौर° M °ग्रहाश्वेत् M 11c संवृता या M 11d श्यावरूक्षा M 12b °रद्विजान् B 12c याने M 12d काष्ठांतां M यत्र भूत्वनः B, यति भस्वना M 13a °भृघुष्टा M 13b सस्या मृदुपपा च M col. om. M

1b रात्रपक्ष° B 2a तु बहुलो M 2d हितौ स्निग्धौ प्रदक्षिणौ M 3c वनेशं B, बलेश्वरं M 4a ब्रह्मणादौश्च B 4b विदिगुत्थं च B, विदिक्षं वर्ण° M 4c च B

दिशां दाहोऽथ जयदः प्रदक्षिण उपागतः ।
श्वभ्रोन्नते वधो राज्ञो जयाय व्यत्ययेन च ॥ ५ ॥

घृताम्बुपयसां स्रावे च्युते वृक्षाच्च तत्क्षयः ।
तैले च नाशो मुख्यानां रक्ते शस्त्रकृतं भयम् ॥ ६ ॥

मद्येन तु मिथो भेदो रुग्भयं दधिनिस्रवे ।
कुसुमात् कुसुमोत्पत्तौ परचक्रागमं वदेत् ॥ ७ ॥

बहुतोयेऽतिसंशोषः कूपेऽसृक्पूर्तिविस्रवः ।
राज्ञोऽब्दार्धाद्वधं कुर्युः स्रोतोऽल्पत्वे परागमः ॥ ८ ॥

वृष्टिविद्युत्स्वनैर्व्यभ्रे चरस्थिरविपर्यये ।
दिनोल्कायां च पीड्यन्ते जना भूपतिभिः सह ॥ ९ ॥

सप्ताहं सन्ततान्यतो वृष्टिर्हन्यान्नराधिपम् ।
अनग्निज्वलने पुंसां व्याधिराश्वेव जायते ॥ १० ॥

पीडा राष्ट्रस्य षण्मासादुष्णशीतविपर्यये ।
मासेऽष्टमे नृपस्यान्तो निनादे पशुपक्षिणाम् ॥ ११ ॥

नगरारण्यसत्त्वानामरण्यपुरसेवने ।
राष्ट्रपीडाधिके वर्षे मुख्यलोकस्य च क्षयः ॥ १२ ॥

स्तम्भोपलकुसूलार्चापीठशय्यापसर्पणे ।
गदने चापि देशस्य नाशं मासत्रयाद्वदेत् ॥ १३ ॥

Testimonia

10a-b cited by Govinda on *MC* 11, 98

Apparatus

5a विजयदः M 5b °णमुपागतः M 5c स्वभ्रोत्क्षते B 5d छायाया व्यये तथा B 6a-b स्रावश्च्युते M 6c तैलेन M 6d भवं M 7b दधिवस्रवे M 8b स्रक्पूतिविस्रवः M 8d तोयोऽन्यत्वे M 9c दिनोल्वीया B, दिनोत्कायां M निपीड्यन्ते M 10a सप्ताहात् M सततान्यतौं Govinda 10b वृष्टिहीना B 10d व्याधिताश्वैव M 11d निगदे मृगपक्षिणां M 12b °मारण्यमुरसेवया M 12d किमु लोकस्य M 13a °परशुक्रार्चा° B 13b °पीठी° M °शैर्या° B °प्रसर्पणे M 13c नदने वा विदेशस्य M 13d मासद्वया° M

गोनागाश्ववधोऽब्दार्धे व्यत्ययो वा नृपान्तकृत् ।
देशनाशस्तथा स्त्रीणां खगाहिपशुसम्भवे ॥ १४ ॥

धान्यरसमद्यभोजनफलपुष्पस्नेहमांसवस्त्राणाम् ।
सिकतारजोरसात्मकसशर्कराङ्गारवर्षेषु ॥ १५ ॥

सुतपत्नी क्षुद्राज्ञा नृपदेशचमूपमरणसंक्लेशाः ।
भेदोऽपदोऽथमन्त्रिव्याधिविनाशभूपक्रोधाः ॥ १६ ॥

निशि सुरचापं सितवर्णाद्यं जनयति पीडां द्विजपूर्वाणाम् ।
भवति च यस्यां दिशि तद्दिश्यं नरपतिमुख्यं न चिराद्धन्यात् ॥ १७ ॥

मृगपशुरासभवाजिगजानां वियतरवो न चिराद्भयदाता ।
विबुधपतिध्वजतोरणपातः फलमिदमेव करोति नृपाणाम् ॥ १८ ॥

(इति) बृहद्यात्रायामुत्पाताध्यायो द्वात्रिंशः ॥

शुद्धैर्द्वादशकेन्द्रनैधनगतैः पापैस्त्रिषष्ठायगै-
र्लग्ने केन्द्रगतेऽथवा सुरगुरौ दैतेयपूज्येऽथवा ।
सर्वारम्भफलप्रसिद्धिरुदये राशौ च कर्तुः शुभे
स्वग्राम्यस्थिरभोदये सुभवनं कार्यं प्रवेशोऽपि वा ॥ १ ॥

Apparatus

14a ऽब्दार्धाद् M 14c °नाशो भवेत् M 15c शिक्ता° B °ताङ्गैवसात्मक्° M 15d °सशुक्राङ्गारवर्षेण B 16a °द्राज्ञा om M 16b °संक्लेशैः M 16c °पदोषमन्त्र° M 16d °व्यधिभयविनाशभूययोगः B °भय° M 17b नृपपूर्वाणाम् M 17c तद्देश्यं M 18b व्ययतरधो B, वियतिरवो M after 18 M adds:

अरुन्धतीं देवपथि ध्रुवं च छायां शशाङ्कस्य च नेक्षते ,यतः ।
अन्यैरदृश्यं यदि वापि पश्येत् वर्षान्तरे मृत्युवशं स याति ॥
छायां शिरस्कांकवधूमनाशः खण्डं पदं देहजघोषहानिः ।
आहारशीलाकृतिवैकृतश्च प्राप्तं कृतान्तं कथयन्ति जन्तोः ॥

See also Utpala on *BY* 15. col. om. M

1n M 33 follows 28, 6 1a °नैधनग्रहैः M 1d त्वग्राम्य° M शुभवशे M

क्रूरोदये तदहनि व्यतिपातयोगे रिक्ते तिथावृतुसमाप्तिषु वैधृते वा ।
तीक्ष्णोग्रभेषु च हुताशविषाभिघातरौद्राणि सिद्धिमुपयान्त्यसिते च पक्षे ॥२॥

केतूल्कार्कजराहुकीलककुजा बिम्बप्रविष्टा यतः
सूर्येन्द्वोः परिवेषखण्डमथवा दृश्येत यस्यां दिशि ।
क्रोष्टुश्वाहिपिपीलिकाशशमृगध्वांक्षादयो वा पुरे
सैन्ये वापि यतो विशन्ति हि ततः शत्रोः पुरं घातयेत् ॥ ३ ॥

पातालर्क्षे राहुकेत्वोः पुरेऽरेस्तोयोच्छित्तिः सालपातश्च कार्यः ।
जामित्रस्थे भूमिजेऽस्यांशके वा पुत्रेणेन्दोर्वीक्षितेऽग्निः प्रदेयः ॥ ४ ॥

(इति) बृहद्यात्रायां पुरदुर्गलम्भो नामाध्यायस्त्रयस्त्रिंशः ॥

दिग्दाहक्षतजरजोश्मवृष्टिपातैर्निर्घातक्षितिचलनादिवैकृतैश्च ।
युद्धान्ते मृगशकुनैश्च दीप्तनादैर्नो भद्रं भवति जयेऽपि पार्थिवस्य ॥ १ ॥

शुभा मृगपतत्रिणो मृदुसमीरणो ह्लादकृत्
ग्रहाः स्फुटमरीचयो विगतरेणुदिङ्मण्डलम् ।
यदान्यदपि वैकृतं न विजयावसाने भवेत्
तदा सुखमकण्टकं नृपतिरत्ति देशं रिपोः ॥ २ ॥

Testimonia

3-4 = *TY* 9, 31-32 1-2 = *YY* 20, 7-8 and *TY* 9, 34-55

Apparatus

2b च M 2c तीक्ष्णग्रहेषु M °विषादिघाते M 4a पातालेऽर्के M पुरेशे M 4b °च्छीतिः B, °च्छत्तिस् M after 4 M adds:

पुरा(रं)रिपोर्भूमिपते नि(तिर्नि)रुद्धयात् श(च्छ)त्रोरनिष्टग्रहदिङ्निविष्टः ।
युद्धस्य यात्रासम एव कालः क्रूरेषु लग्नेष्वथ कूटयुद्धम् ॥
अन्तर्मुखाः पौरभयं विहङ्गाः प्राकारसंस्था विनिवेदयन्ति ।
आगन्तुनाशं च बहिर्मुखास्ते तुल्या विहङ्गैस्समा कुजाश्च ॥

(तुल्यं विहङ्गैः सरमात्मजाश्च). These verses are *TY* 9, 29-30. col. om. M

In M the order is 4; 1c-d; 1a-b; and 2 1a निर्घातक्षतजरजो° M 1c युक्षान्ते B 1d जिते *TY* 2c यद्यन्य° B, यदन्य° *TY*, *YY*

उद्वाहमकालोत्सवमभिषेकं चात्मजस्य यः कृत्वा ।
प्रस्थानाविहतः सोऽभ्येति ततश्चोत्सवदिनेषु ॥ ३ ॥

परविषयपुराप्तौ साधुदेवद्विजस्वं
कुलजनवनिताश्च क्ष्माधिपो नोपरुन्ध्यात् ।
विगजतुरगशस्त्रान्नार्तिभीतांश्च हन्या-
च्छुभतिथिदिवसर्क्षे हृष्टसैन्यो वशेच्च ॥ ४ ॥

स्वविषयमुपगम्य मानवेन्द्रोऽवलिमुपयाचितकानि चाधिकानि ।
निगदितविधिनैव संप्रदद्यात् प्रथमगणासुरभूतदैवतेभ्यः ॥ ५ ॥

इति मनुजपतिर्यथोपदेशं भगणविदां प्रकरोति यो वचांसि ।
स सकलनृपमण्डलाधिपत्यं व्रजति दिवीव पुरन्दरो चिरेण ॥ ६ ॥

इति श्रीवराहमिहिरविरचितायां यक्षेश्वरमेधीययात्रायां जयोत्तरलक्षणपरिभाषाध्यायश्चतुस्त्रिंशः ॥

समाप्तोऽयं ग्रन्थः ॥

—: * :—

Appendix A: the verses preceding 2, 15 in Viṣṇuśarman.

यदि जन्म(विलग्न) राशि(केशौ) हिबुकेऽस्तगृहे ऽरिपापदृष्टौ ।
विबलावधिकौ तयोर्यदा तौ प्रतियानमसंशयं स यायात ॥ १ ॥

तयोरष्टमे षष्ठभे वा विलग्ने तदष्टारिभेशौ यदा वा तनुस्थौ ।
यदा तत्पती दुर्बलौ तौ तथा हि प्रयाणं विषग्रासतुल्यं करोति ॥ २ ॥

Testimonia

4 = *YY* 20, 9 and *TY* 9, 33 5=*YY* 20, 25 6=*YY* 20, 10

Apparatus

3 om. M 3c प्रस्थातविहताशो B 3d तातश्चो° B 4b °वनितानां M, °वन्ताश्च B 4c विगतगजतुरङ्गान् पीडितान्नोपहन्या - M, जनपदहितयुक्तः पूजयेत् पौरमुख्यान् *YY* °न्नार्त° *TY* 4d स्थिरतिथिकरणर्क्षे *YY* वशेत्तु M, *TY* 5c संनिदध्यात् *YY* col. इति महायात्रायां चतुर्विंशोऽध्यायः M after the colophon M adds appendix B

1b हिबुके वास्तगृहे ed. 1d यदि यायादसंशयं ed.

करोति राशिर्गमनं शुभं च परो विलग्ने शुभदृष्टियुक्तः ।
स्थिरोदये स्याद्गमनं न जातु शुभं शुभैर्दृष्टियुतेऽत्र वाच्यम् ॥ ३ ॥

द्विमूर्तिराशावुदयं प्रपन्ने क्रूरग्रहैर्युक्तनिरीक्षिते च ।
प्रयाति यद्यप्यबुधस्तादानीं निवर्तते शत्रुजनाभिभूतः ॥ ४ ॥

केन्द्रत्रिकोणेषु शुभस्थितेषु पापेषु केन्द्राष्टमवर्जितेषु ।
सर्वार्थसिद्धिं प्रवदेन्नराणां विपर्ययत्वे तु विपर्ययः स्यात् ॥ ५ ॥

Appendix B: the verses following chap er 34 in M.

एष्यो धनं क्षपयति व्यतिपातयोगो
मृत्युं ददाति नियतं खलु वर्तमानः ।
सन्तापशोकवधदैन्यभयान्यतीत-
स्तस्माद्दिनत्रयमिति प्रजिहीत विद्वान् ॥ १ ॥ (=११)

अतीतमेष्यं तदहश्च केचिद्दिनत्रयं दूषयतीति शास्त्रम् ।
न संहितायामरिक्तान्त्रिकाणामेवं प्रकारो व्यतिपातयोगः ॥ २ ॥

चन्द्रार्कबिम्बान्तरमेकमार्गाद्यावत् परिक्रामति योऽस्य कालः ।
यातो यदा स्यादथवा भविष्यन् तावत् फलं तस्य कुतोऽस्त्यभावात् ॥ ३ ॥

नक्षत्रदोषात् सकलस्य राशेर्न दूषणं भस्य न राशिना च ।
ऋक्षेऽपि चन्द्रार्ककृतः स योगस्तन्मात्रमेवेति मतं बहूनाम् ॥ ४ ॥

राशिद्वयैक्ये गमने च दोषो धिष्ण्यस्य नास्त्यन्यगृहाश्रयत्वात् ।
एकाल(य)स्थस्य न राशिदोषः स्याद्दूष्यतेऽतीव भवेत् प्रसङ्गात् ॥ ५ ॥

मेषस्य दोषाद्बहुलापि दृष्टा वृषोऽपि दृष्टो बहुलाश्रयेण ।
तेनापि सौम्यं मिथुनं च तेन पुनर्वसुस्तेन च कर्कटश्च ॥ ६ ॥

नक्षत्रदोषात् खलु राशिदोषो भं राशिदोषेण च दूष्यमेति ।
यद्येवमन्योन्यसमाश्रयत्वाद्भानां नवानामपि दोषसङ्गः ॥ ७ ॥

Apparatus

2c न संहिताद्दभरिकतांत्रि° M 3c यातोभया M 6b दृष्टे M

पिष्टेन दोषेण च भस्य दोषो बौधेन कौजस्य यथा न चाह्नः ।
एवं तथा न व्यतिपातदोषः कालं हिनस्तीति गतं भविष्यन् ॥ ८ ॥
विषप्रदिग्धेन हतस्य पत्रिणां मृगस्य मांसं सुशुभं क्षताद्दते ।
यथा तथैव व्यतिपातदूषितः क्षणोऽत्र दूष्यो न च भं न वासरः ॥९ ॥
तस्मै प्रणम्य शिरसा व्यतीपाताकुलीकृतैर्यजनैः ।
युक्तायुक्तविचारैर्वराहमिहिरश्चकार मतिम् ॥ १० ॥
एष्यो धनं क्षपयति व्यतिपातयोगो
मृत्युं ददाति नियतं खलु वर्तमानः ।
सन्तापशोकवधदैन्यभयान्यतीत-
स्तस्माद्दिनत्रयमिदं परिवर्जनीयम् ॥ ११ ॥ (=१)
भवनद्वयैकांशकं चन्द्रार्कभे तिष्ठतः समाक्रम्य ।
सिंहकुलीरे च तथा स्फुटगणिते स व्यतीपातः ॥ १२ ॥
अयमेवार्कोऽभिहितः शशिभानोरेकनाथभद्विगयोः ।
षड्विंशे षड्विंशे व्यतीपातः पतति नक्षत्रे ॥ १३ ॥
रविचन्द्रौ (यदि) तदहनि परस्परं प्रकुपितौ निरीक्षेते ।
क्रोधनयनानलभवो दृक् संपातान्तयोर्भवति ॥ १४ ॥
रौद्रो दीर्घः............कृष्णः शुक्लः संभवत्येव ।
सर्वारम्भेष्वशुभो व्यतीपातः कीर्तितः कैश्चित् ॥ १५ ॥
परस्परं रविशशिनोर्निरीक्षतोर्यदा तदा तदा गुरुबुधभेषु केवलम् ।
अथैकदिग् भवति(च)नित्यमेव वा निरन्तरं भवन उपास्य शाश्वतः ॥१६॥
चन्द्रेऽजपर्यन्तविलिप्तिकास्थे भानुर्यदा वृश्चिकमभ्युपैति ।
तावत्तदेकेन मतेन कोऽस्य नक्षत्रवद्राशिसमुद्भवो वा ॥ १७ ॥
षडशीतिमुखान्ययने विषुवद्द्वयमथ च शर्वरीमानम् ।
केवलसूर्यान्येतान्यनुवेक्ष्य विभावरीनाथम् ॥ १८ ॥

Apparatas

10b °कृता यजनैः° M 12a द्वयकैशकं M

15b कृष्णश्शाकु° M

नक्षत्रान्मृदुस्थिरादुभयतीक्ष्णातीक्ष्णं लघुषु कार्येषु ।
पंसवनविवाहक्षौरयात्रादिकाश्च शशिगत्या ॥ १९ ॥

तिथिकरणव्यतिपाता गण्डान्तो वैधृतस्त्र्यहःस्पृक् च ।
चन्द्रार्कगतिवियोगाद्वा घातव्यानि सूर्यशशिगत्या ॥ २० ॥

रविशशिगतिलक्षणो ऽप्यकालो न पृथगयं शशिनो यतः किमर्थम् ।
शशिगृहपतिसंस्थितः प्रमाणं दिनकरचारवशाद् भवेत् कश्चित् ॥ २१ ॥

कियत् प्रमाणश्च समानकालो यतो (ततो) नागतयातचिन्ता ।
यदास्य कालः पति+अव्य+एकः सः श्रूयतेऽन्यः पतितस्य चापि ॥२२॥

उपलक्षणमात्रमिदं कथितं न तु लक्षणमेव भराशिकृतम् ।
रविचन्द्रकलापरिणामकृतो दिनकृद् ग्रहवत् समयोऽस्य+मतु+ ॥ २३ ॥

प्रारम्भकालादसमाप्तिकालो यावद्ग्रहस्येव स वर्तमानः ।
तस्योपलब्धिर्गणितेन तत्त्वं प्रोक्तं च सर्वं करणे मयातः ॥ २४ ॥

केचिदशिक्षितत्वाद्विक्षेपवशादपक्रमं शशिनः ।
कृत्वात्रायनभागैस्तुल्यं व्यतिपातमिच्छन्ति ॥ २५ ॥

लल्लाचार्यमतं किल मार्गैकत्वं यदार्कचन्द्रमसोः ।
भवति तदा व्यतिपातो वाक्यमिदं तस्य चार्ये द्वे ॥ २६ ॥

चन्द्रोऽर्कोनं भगणार्धमुद्धरेद्रविशशिद्विभुक्तिभ्याम् ।
मार्गैकत्वं न भवति विक्षेपापक्रमांशमार्गेण ॥ २७ ॥ (=29, a-b)

गगने निशा चरार्कभयुगपत् स्यातां यदैकमार्गस्थौ ।
भगणादधिकश्च यदा शशी च स भवेद् व्यतीपातः ॥ २८ ॥

मार्गैकत्वं न भवति हि विक्षेपापक्रमांशमार्गेण । (=27, c-d)
कथयति तस्माद्ग्रहणं भानौ मार्गैकभे हेतुः ॥ २९ ॥

मार्गैकगं किलेन्दुं नियमात् संचराद्यतोऽन्यथा मेघः ।
तद्विक्षिप्ते ऽवहिते नेह भवत्यक्षवैषम्यात् ॥ ३० ॥

एकस्मिन्नपि देशे मार्गैकत्वं न भवति सर्वत्र ।
व्यतीपातं चेदेव न कदाचित् सः सव्यतीपातः ॥ ३१ ॥

Appendix C: the Calcutta Fragment of Utpala's *Yakṣeśamedhiyayātrāvivṛti.*

(स्वर्क्षेशदशाधिपयोर्मित्रोदासीनशत्रुभांशभवाः ।
तत्पाकभुजश्चोक्ता विजिगीषोर्मित्रमध्यरिपवः ॥ [12,3])

F. 124...1 ते ते ऽपि सर्व एव विजिगीषोर्मित्रमध्यपरा उक्ताः कथिताः । एतदुक्तं भवति । स्वर्क्षेशदशाधि(पयोर्मि)त्रग्रहदशा वर्तते येषां ते विजिगीषोर्मित्राणि । उदासीनदशा येषां ते मध्यस्थाः । शत्रुद(शा येषां ते) पराः । चकारः समुच्चयमेवार्थम् । देवादर्शे ? ग्रहा स्वक्षेत्राधिप(ा) रिपुभवनभागजात............चैवम् । रिपवः प्राक्यत (?) सहजास्तत्पाकभुजश्च भृतकाख्याः । त्रिविधो ऽप्येवं त्रिविधा व्याख्या............ योनयश्च मित्रगुणाः स उदासीन इति स्यात्तदपि दशो मध्यमः प्रोक्तः । एवं मित्रोदासीनश (त्रु)-भांशभवाः संग्रहणीयाः । तथा च कौशिकश्चाह ।

एभिरुपायैर्बलिभिर्मित्रोदासीनश(त्रुभां)शभवाः ।
स्वपुरबलसंनिविष्टाः स्वीकर्तव्या नरेन्द्रेण ॥

अधुना ग्रहषाड्गुण्यं के मे षड्गुणा उ(क्ताः ॥

सन्धिं च विग्रहं चैव यानमासनमेव वा ।
द्वैधीभावं संश्रयं च षड्गुणान् संश्रयेत् सदा ॥

तत्र च योज(नमा)ह ॥

रिक्तानिष्टदशोऽरिर्नियमाद्विजिगीषुणा समुच्छेद्यः ।
अविरोहिदशः पी(ड्यःक)र्षयितव्य(स्त)थारोही ॥ [12, 4]

विजिगीषुणा शत्रोर्जन्मकाले न्वेष्यः । तत्र च योऽरिः शत्रू रिक्तानिष्टदशः । रिक्त(ा) । अनिष्टा वा दशा यस्य रिक्तदशोऽनिष्टदशश्च । तासां लक्षणं जातक उक्तम् ।

बलवर्जितस्य रिक्ता तथा नीचांशगतस्य ।
शत्रुभागे ज्ञेया नेष्टफलेति ।

एवंविधो यः शत्रुः स नियमान्निश्चयाद्विजिगीषुणा जेतुमिच्छता समुच्छेद्यः । स्वस्थानाच्चालनं शत्रोः समुच्छेद उदाहृतः । अवरोहितदशः

Apparatus

20 पी......र्शयि° C

पीड्य इति । (इ)ष्टस्य तुङ्गादवरोहिसंज्ञा । इत्यवरोहिणी दशा यस्य शत्रोः स पीड्यः पीडनीय इति । राष्ट्र(वा)सस्य विनाशस्तस्य कर्तव्य इत्यर्थः । कर्षयितव्यस्तथारोही । रिपुपरिच्युतस्येति । आरोहि(णी)दशा यस्य शत्रोः सः कर्षयित(व्य): कृशभावमापादनीयः । हस्त्यश्वोष्ट्रसुवर्णादिना भूम्येकदे(श:)कर्षणीयः । पीडनकर्षणलक्षणम् ।

राष्ट्रे दाहविलोपैः फलकाले यत्र पीडनं प्राहुः ।
भूम्येक(दे)शहानिः कर्षणमर्थेन गुरुणा वा ॥

तथा च कामन्दकिः ।

रेचनं कोशदण्डाभ्यां महामा........स्तथा ।
एतत्कर्षणमित्याहुराचार्याः पीडनेरणमिति ॥

अधुना सन्धिलक्षणमाह ॥

(न स) दृशदशोऽभियोज्यः संधानं तेन भूपतेर्न्यायम् ।
end F.124 अशुभैष्यासन्नदशः शुभैष्य (पाकेन संदध्यात् ॥ [12,5])
(सकलफलददशाढ्यके प्रवरा मध्याष्टवर्गसंशुद्धौ ।
न्यूनफला तात्कालिकविलग्नतिथिदिवसकरणाद्यैः ॥ [12, 16])

F.131 ....फलदा भवति । तात्कालिकेन शोभनेनानुकूलेन लग्नेन विलग्नेन तिथिना शुभेन करणेन ववादिना शुभेन दिवसेन शुभग्रहवासरेणादिग्रहणान् महूर्तनक्षत्रांशकेषु या यात्रा परिगृह्यते सा न्यूनफलाधमफलेत्यर्थः ॥

अन्यानपि प्रकारानाह ॥

उत्तमफलदा यात्रा त्रिकोणतुङ्गोपगेषु सौम्येषु ।
मध्या स्वमित्रभवनोपगेषु नीचारिभेष्वधमा ॥ [12, 17]

सौम्येषु शुभग्रहेषु बुधगुरुशुक्रेषु तत्कालं त्रिकोणतुङ्गोपगेषु त्रिकोणे मूलत्रिकोणे तुङ्गे वा स्वोच्चराशावुपगतेषु या यात्रा परिगृह्यते सोत्तमफलदा प्रधाना । मध्या स्वमित्रभवनोपगेषु । तेष्वेव सौम्येषु स्वभवने स्वराशावुपगतेषु प्राप्तेषु मित्रराशावुपगतेषु वा या यात्रा

Apparatus

17. वावादिना C

परिगृह्यते सा मध्या मध्यफला। नीचारिभेष्वधमा। तेष्वेव सौम्येषु नीचारिभेषु नीचराशिषु अरिभेषु शत्रुराशिषु वा स्थितेषु सत्सु या यात्रा परिगृह्यते साधमानिष्टफलेत्यर्थः ॥

अत्र च षट्प्रकारां यात्रामाह ॥

मध्याधमाधमोत्तमसममध्याधोधरोत्तमोत्कृष्टा।
मध्योत्तमा च षोढा या(त्रा) यात्राविदामिष्टा ॥ [12, 18]

F.131 सत्फलदशाविपाक इत्यादिना ग्रन्थेन ये त्रयो यात्राभेदा उक्तास्तान् यथाक्रमं स्थापयित्वा। ततोऽनन्तरोक्ता उत्तरसत्फलदा यात्रा इति ये त्रयो भेदा उक्तास्ते तदधः क्रमेण स्थापनीयाः। ततो मध्याधमा इति। अष्टकवर्गपरिशुद्धेषु ग्रहेषु नीचारिक्षेत्रगेषु या यात्रा गृह्यते सा मध्याधमा। अधमोत्तमा इति। नीचारिक्षेत्रगेषु ग्रहेष्वधमा सत्फलदशाविपाके चोत्तमा। एवंविधा या यात्रा गृह्यते साधमोत्तमा। सममध्या। अष्टकवर्गपरिशुद्धेषु स्वक्षेत्रमित्रक्षेत्राश्रितेषु च या यात्रा गृह्यते सा मध्यमध्या। अधोधरा इति। तात्कालिकलग्नादिपरिशुद्धेषु नीचारिक्षेत्रगेषु च ग्रहेषु च या यात्रा सा अधोधरा। अधमाधमा इत्यर्थः। उत्तमोत्कृष्टा इति। सत्फलदशा-विपाके वर्तमाने स्वोच्चत्रिकोणोपगेषु चाशुभग्रहेषु या यात्रा गृह्यते सोत्तमोत्कृष्टा। उत्तमोत्तमेत्यर्थः। मध्यमोत्तमा च। अष्टवर्गपरिशुद्धेषु ग्रहेषु स्वत्रिकोणोच्चगेषु च सर्वग्रहेषु या यात्रा गृह्यते सा मध्यमोत्तमा। एवं षोढा षट्प्रकारा यात्रा यात्राविदां यात्राज्ञानामिष्टाभिमता। नन्वत्र यात्राजसिंहतुरगोपग इव वरिष्ठ [12, 15a] इत्यादिना ग्रन्थेन ये यात्राविद्भिस्त्रय उक्तास्तैः सह बहवो भेदा भवन्ति।

end F.131.

(व्रणपिटकतिलककलांछनमशकादयस्त्वेव निर्दिष्टाः स्युः।
कण्डूयनं नरपतेर्दक्षिणपाणौ जयायैति ॥ [13, 10])

F.145. ....यथा देहस्पन्दने फलं तथैषामपि। आचार्येण गर्गादीनां मतमुक्तम्। गर्गपराशराद्यैः पुरुषस्य दक्षिणाङ्गस्फुरणे यत् फलमुक्तं तत् स्त्रीणां वामाङ्गे।

तथा च वृद्धगर्ग आह।

Apparatus 14 °परिशुद्धो C 21 यात्राविदः त्रय C

दक्षिणाङ्गाश्रिताः पुंसां स्त्रीणां वामाङ्गमाश्रिताः ।
विपरीता न शस्यन्ते नास्ति तेषु फलानि वा ॥
तथा च पराशरः ।
उत्पातगण्डपिटका दक्षिणतो वामतस्त्वतीच्छातः ।
अन्या भवन्ति पुंसां तद्विपरीताश्च राशीनाम् ॥
कस्मादाचार्येण स्त्रीणामङ्गस्फुरणं न कृतमित्यत्रोच्यते । आचार्येणात्र यात्रोपयोगिकमात्रमुक्तम् । तथा चात्र शाकुने पठितम् ।
ग्रामारण्यप्रचाराद्यं लोकादेवोपलक्षयेत् ।
संविक्षिप्सुरहं वच्मि यात्रामात्रप्रयोजनम् ॥ [23, 6]
तथा च
माभूत् प्रसङ्गादतिविस्तरोरगजान्वपुंलक्षणदर्शनेषु ।
निमित्तमात्रं कथयाम्यतोऽहं प्रयाणकालोपयिकं नृपाणामिति ॥ [21, 1]
नारी विजिगीषुगुणेनाधिक्रियते । तस्मादयं तदेष इति ।
कण्डूयनं नरपतेरिति । नरपते राज्ञो दक्षिणपाणौ सव्यहस्ते कण्डूयनं जयायेति शत्रुविजयार्थमागच्छेदित्येतदुक्तं भवति ॥
यात्राकाले नृपस्य दक्षिणहस्ते कण्डू । यनं जयाय भवति ॥
F.145. भट्टोत्पलविरचितायां यक्षेशमेधीययात्राविवृतौ देहस्पन्दनाध्यायश्चतुर्दशः ॥
अथातोऽरिष्टलक्षणं व्याख्यायते । तत्रादावेव वर्षान्तरे ऽरिष्टपरिज्ञानमाह ॥
अरुन्धतीं देवपथं ध्रुवं वा छायां शशाङ्कस्य न वेक्षते यः ।
अन्यैरदृश्यान् यदि वीक्ष्यते वा वर्षान्तरे कालवशं स याति ॥
[after 32, 18. in M]

अरुन्धती वसिष्ठभार्या । तां गगने तन्निकटे स्थितां यः पुरुषः न वेक्षते न पश्यति स तु वर्षान्तरे वर्षमध्ये कालस्य मृत्योर्वशं याति गच्छति म्रियत इत्यर्थः । देवपथं मागवेषीगङ्गाप्रवाह इति लोके प्रसिद्धः । ध्रुवो ध्रुवतारकः प्रसिद्ध उत्तरस्यां दिशि दृश्यते । सूक्ष्मात् सूक्ष्मतरं परात् परतरं यत् पंचमं तद्ध्रुवम् । ध्रुवमत्स्यमध्यवर्तिनं तारकमित्यर्थः । छायां शशाङ्कस्येति । शशाङ्कस्य चन्द्रस्य छायां चन्द्रमण्डले मलं शश इति

Apparatus
17 भट्टो° C यक्षेश्व° C 19 देहपथं C

प्रसिद्धम् । तां शशाङ्कस्य संवर्धिनीं छायाम् । एतेषामुक्तानां पदार्थानामेकतमं यः पुरुषो न पश्यति स वर्षमध्ये म्रियत इति । अदृश्यान् यदि वीक्ष्यते वेति । अन्यैश्च पुरुषैर्यानि यस्तु ऋक्षाणि न दृश्यन्ते तानि F.146. यदि । वीक्ष्यते पश्यति तदा स पुरुषो वर्षान्तरे कालवशं यातीति ।

अथान्यानप्याह

छायाशिरस्काकचधूमनाशः खण्डं पदं देहजघोषहानिः ।
शरिरशीलाकृतिवैकृतानि प्राप्तं कृतान्तं कथयन्ति जन्तोः ॥

[after 32, 18 in M]

छाया आत्मीया देहच्छाया । शिरस्का शिरोरहिता या । पतितस्य जन्तोः पुरुषस्य कृतान्तं मृत्युं प्राप्तं निकटवर्तिनं कथयन्ति मुनयः । अन्य एव वदन्ति यथा निर्मले गगने रविं पृष्ठतः कृत्वा स्वदेहच्छायां भूमौ क्षणमात्रं दृष्ट्वा गगने पुनः पश्येत् तत्र च यद्यपि शिरस्का दृश्यते तदा सा छायाशिरस्का । कचधूमनाशः । आतपस्थस्य पुरुषस्य कचेभ्यः केशेभ्यो मूर्धनि यद्धूमं निर्गच्छमानं दृश्यते दह(नो) वा पृच्छायां तस्य नाशः अदर्शनम् । खण्डं पदं प्रक्रमतो ऽस्थूलपृष्ठे खण्डं पदं पादमुद्रा खण्डिता भवति । तथा देहजघोषहानिः । देहजो यो घोषः शब्दः कर्णौष्ठगिलाङ्गुलिभ्यां घोषः शब्दो यत्नोपलभ्यते तस्य हानिरनुपलम्भनम् । तथा शरीरस्य देहस्य यच्छीलं स्वभावः । आकृतिराकारः । एतयोर्वैF.146. कृतानि विकारा । अन्य ऋपत्व (?) मेतेषामुक्तानामेकतमं यस्य दृश्यते तस्य जन्तोः प्राप्तं कृतान्तं मुनयः कथयन्ति प्रवदन्ति ॥

तथा च भगवान् पराशरः ।
प्रकृतेर्विकृतेर्नृणां बुद्धीन्द्रियशरीरजा ।
अकस्माद्दृश्यते येषां तेषां मरणमादिशेत् ॥
एतत्समासं कथितं विस्तरोऽयमतः परम् ।
सूक्ष्मारिष्टावबोधार्थं स्पष्टं पुष्ट्यर्थमेव च ॥

Apparatus

1 संवधिनीं C   3 नेति C

16 °ह्रानः C

तत्र व्यभ्रे नभसि रवीन्दुज्वलनप्रभासु स्वच्छायारुन्धतीध्रुवान्यतारकाणां दृश्याणामदर्शनं मरणाय मासे द्वादशे। बहिसूर्येन्दुप्रभावानामदर्शनमेकादशे। सुवर्णरजतमुत्रपुरीषाणां वा स्वप्ने प्रच्छेदनं दशमे। यक्षरक्षःप्रेतपिशाचानामस्वप्ने दर्शनमतीन्द्रियाणामृते योगान्नवमे। बहुसंपन्नभुजो वाकस्माद् बलापचयो न श्रुतो वातिवृद्धिरष्टमे। सिकतायां सुकर्दमेषु विकृतासमकलपदाङ्कदर्शनं वा सप्तमे। काकश्येनगृध्रादीनां क्रव्यभुजां पक्षिणामकस्माच्छिरस्यभिलपनं (?) (षष्ठे)। गोमेषतुल्यपूर्णरजसाङ्गेभ्य F.147. उत्तमाङ्गाद्वा प्रवर्तनं देहच्छायाविकृतदर्शनं वा पंचमे। विद्युतां दर्शनममोघ (?) चतुर्थे। श क्रून्मेढ्वनुषां दर्शनमुहंदक (?) तृतीये। एकनयनव्याड्रादिनां वोषमाहाग्लवशं (?) वा द्वितीये। वद्धाढीकृतनासाभिन्नदर्शनं (?) सामान्ते सामान्यय(?)शोणितकुणपविट्मूत्रमनोज्ञगन्धप्रवर्तनमहेतुकं गात्रे स्याद् द्वादशाहात्। परचक्षुषि स्वशरीरादर्शनं निवातधूपगन्धस्याघ्राणं सप्ताहात्। सद्यः स्नातानुलिप्तस्य हर्षाणि पादाशुशोषणं जलार्द्रा शिरसि धूमाभिदर्शनं सूर्यसंतप्तमस्तकस्यादर्शनमूष्माणो वा त्र्यहात्। कृष्णपरुषवर्णप्रादुर्भावो गात्रे मुखे च पद्मप्रभासादृश्यं गण्डयोश्च रक्ततिलकानामुत्पत्तिरहोरात्रात्। निर्मलेभस्यादर्शे वात्मदेहादर्शनं शिरसः श्रोत्रद्वयोरङ्गुलिः श्रवणद्वयोरन्तर्नादाश्रवणं सद्यो मरणायापि च ॥

सर्वदृष्टिरस(ग्रह)घ्राणशब्दा विपर्यया।
लक्ष्यन्ते हि मुमूर्षूणां स्वस्था स्वस्थशरीरिणाम् ॥
श्लथं खरं घनं श्लक्ष्णं शीतोष्णस्य विपर्ययः।
अकस्माद्वेत्ति यो देही दुर्लभं तस्य जीवितम् ॥
तोयवन्मेदिनीं तोयं मेदिनीमिव पश्यति।
अतीन्द्रियं निरीक्ष्येत न वेत्ति करसंस्थितम् ॥
F. 147. पृथिवीं शिवमाकाशमाकाशमिव मेदिनीम्।
आकाशमिव वात्मानं पूर्णमिन्दुमथातिथिम्।

Apparatus

2 after °दर्शन° C repeats 2 मरणाय to °दर्शनं° 3 प्रश्छंदनं C 5 श्रतो C 12 ह्याद् C 17 °रंगुल्य C 20 श्लष्णं C for श्लथं 21 दुर्लभस्तस्य C 22 तोयवंदेदिनीं C 25 आकाश इव C °तिथौ C

कृष्णशुक्लविपर्यायं स्थूलसूक्ष्मविपर्ययम् ।
विपर्यासं सदसतामीक्षते जीवितक्षमः ॥
षण्णां रसानां पर्यास इष्टानिष्टविपर्ययः ॥
सर्वथा ग्रहणं पश्येद्विग्रहातीन्द्रियग्रहैः ।
अभक्ष्यं लोलुपत्यर्थं मरणायोपजायते ॥
शोभनं शोभनं श्रेयो ग्रहणे तु विपर्ययः ।
सुरभीनामतिद्वेषो दुर्गन्धानामनिष्टता ॥
असुक्षयाय निर्देश्यं प्रकृतेर्विकृतेर्यदि ।
गीताय न वाद्यानामकस्माच्छृणुयाद् ध्वनिम् ॥
तनुवृत्ते न श्रृणुयाद्विपरीतं श्रृणोति वा ।
वाचं दद्यादनाहूत आहूतो न श्रृणोति वा ॥
दिव्यं ध्वनिं वा श्रृणुयाच्छृणुयाद्वातिभैरवम् ।
अयाचितामादिशति भिक्षामेहीत्यसुक्षयः ॥
यो न वेत्तीन्द्रियं ग्राह्यं वेत्ति वातीन्द्रियं नरः ।
तपोयोगादृते देही देहमन्यं प्रयात्यसौ ॥
सुरभिर्यस्य सुरभिर्यस्य गन्धः प्रवर्तते ।
अस्वस्थः स्वस्थदेहः स्याद्दृष्टं तज्जीवितान्तकृत् ॥
अवक्र····यो नाभी न कृष्ण····ि····रुम् ।
अवक्रस्नावि वा यस्य पिण्डं पश्यत्यसौ य(म)म् ॥
F.148. परिश्रान्ते स्थिते व्यस्तेऽव्यस्ते जिह्मे विलोचने ।
उलुलू....घनो....क्वो विद्रुष्टीकेऽविद्रुष्टिके ॥
सुवर्णस्यावरहिते निमेषरहिते प्लुते ।
निम्ने निमेषवहुले नेत्रे स्यातामसुक्षये ॥

Apparatus

2 °क्षमम् C 5 लोलमत्यर्थं C 7 °मवीष्टता C
13 भिक्षादेहीत्यसुक्षयम् C 19 °स्नाभि C

12

अकस्मात् पुष्पिता रूक्षा दग्धास्थिसदृशाश्चलाः ।
सूक्ष्मस्थूलविपर्यस्था विरलाः सहितास्तथा ॥
अतिदीर्घातिह्रस्वा वा नताः शर्करिणोषिताः ।
प्रकृत्या विकृता दन्ता दृश्यन्ते जीवितक्षये ॥
स्वरः प्रकृत्या विहितो विस्वरोऽतिस्वरः कृशः ।
अजैडकडङ्कारीणां पक्षिणां वासुसंक्षये ॥
सूक्ष्मार्थदर्शनी मन्दो ऽमन्दो ऽसूक्ष्मार्थदर्शनी ।
तपोयोगादृते ऽतीवबुद्धिः स्यात् प्राणसंक्षये ॥
इष्टैरनिष्टसेयोगो ऽनिष्टैरिष्टसमागमः ।
भयशौर्यविपर्यासो जायते प्राणसंक्षये ॥
अतिदीर्घो ऽतिह्रस्वो वा सतमस्को ऽतिशीतलः ।
उच्छ्वासः प्राणसंत्यागे गातासूनां प्रजायते ॥
अनाहतानां शब्दः स्यादाहतानामशब्दता ।
कांस्यानामतिशब्दश्च मुमूर्षूणां सदा गृहे ॥
इति ॥

F.148 भट्टोत्पलविरचितायां यक्षेशमेधीययात्राविवृतौ सद्योरिष्टलक्षणाध्यायः पंचदशः ॥

अथ चित्तशुद्धिर्व्याख्यायते ॥ । तत्रादावेव तद्विज्ञानमाह ॥

पृष्टव्यो दैवविदा विश्रब्धमुपह्वरे नराधिपतिः ।
रिपुनिधनप्रणिधानं प्रति भवतः किं मनः कुरुते ॥ [14, 1]

दैवं वेत्तीति दैववित् । दैवविदा दैवज्ञेन विश्रब्धमनाकुलं स्पष्टार्थमुपह्वर एकान्तप्रदेशे सादरं वा नराधिपती राजा पृष्टव्यः । रिपुनिधनप्रणिधानं प्रति रिपोर्निधनं विनाशस्तस्य रिपुनिधनस्यप्रणिधानं प्रति । प्रणिधानं चित्तसमाधानमेकं नमस्कुरुत इत्यर्थः । रिपुनिधनप्रणिधानं प्रति रिपु-

Apparatus

1 दग्दा° C 6 °डकारीवा C 10 भयखैर्य° C 11 सतमस्के C 16 भटोत्पल° C यक्षेश्व° C 19 विस्रब्द° C

विनाशनिश्चयं प्रति । भवतस्तव । किं मनःकुरुते किं मनस्युत्साहोऽस्त्यनुत्साहो वेत्येतदुक्तं भवति । यथा राजेकान्तव्यवस्थितस्तदा दैवविदात्रान्तमापृच्छनीयो रिपुविनाशनिश्चयनिमित्तं भवतो मनस्युत्साहो न वेति ॥

अत्रैव विशेषमाह

ब्रूयात्स चेन्मम मनः प्रोत्सहते हर्षयेत्ततश्चैवम् ।
चित्तानुकूलता सिद्धिलक्षणं तत्र च श्लोकाः ॥ [14,2]

चेच्छब्दो यद्यर्थे । स राजा यद्येवं ब्रूयाद्वदेत् । यथा मम मनश्चित्तं प्रोत्सहते प्रोत्साहं विददाति ततस्तस्माद्धेतोर्नृपं राजानं हर्षयेत् प्रोत्साहयेत् । F 149. अतश्चित्तानुकूलता (सिद्धिलणं चित्तस्य मनसोऽनु)कूलताभीष्टस्य सिद्धेर्लब्धिलक्षणम् । अनुकूले मनसि सर्वार्थसंपत्तयः । तत्र च तस्मिंश्चित्तानुकूल्य इमे श्लोका वक्ष्यमाणा ऋषिकृताः पठति ॥

तांश्चाह ॥

शुभाशुभानि सर्वाणि निमित्तानि स्युरेकतः ।
एकतश्च मनःशुद्धिस्तद्धि शुद्धं जयावहम् ॥ [14,3]

निमित्तानि चिह्नानि फलसूचकानि सर्वाण्येव निःशेषाणि शुभाशुभान्येकत एकस्मिन् पक्षे स्युर्भवेयुः । एकतोऽन्यस्मिन् पक्षे मनःशुद्धिश्चित्तशुद्धिरेकैव फलदर्शिका । हि यस्मादर्थे । यस्मात् तच्छुद्धं मनः शुद्धं सर्वमेव विजयावहं विजयप्रदमिति ॥

अन्यदप्याह ॥

कियच्चिरं न लभ्येत निमित्तं गमनानुगम् ।
नन्वेव तु मनोऽनर्थं चिरेणाप्यनुमन्यते ॥ [14,4]

कियत् किमपि परिमाणं दिनं बहुकालं निमित्तं शकुनं गमनानुगं यात्रायामनुकूलं न लभ्येतावश्यं लभ्येत । नन्वेव तु एवं न गमनानुगं निमित्तं न लभ्येतावश्यं । मनश्चित्तमनर्थं विपरीतार्थं चिरेणापि कालेनानुमन्यते

Apparatus

7 सिद्धिर्लक्षणं C 9 °नृपं] °र्वधं C 25 लभ्येतावभ्यां C

F.149. ऽनुमननं करोति । एतदुक्तं भवति । यथा राजा दैवज्ञेन पृष्ट एवं वक्ति यथा रिपुनिधनप्रणिधानं प्रति मम मनो न प्रोत्सहते तदान्यस्मिन् काले पुनरपि नृपः पृष्टव्यः । नैवं यतश्चिरेणापि कालेन तस्य मनोऽनर्थमनुमन्यत इति ॥

अन्यद्प्याह ॥

निमित्तानुचरं सूक्ष्मं देहीन्द्रियमहत्तरम् ।
तेजो ह्येतच्छरीरस्थं त्रिकालफलविन्नृणाम् ॥ [14,5]

यदेतन्मनस्तन्निमित्तानुचरं निमित्तानां शुभाशुभानामनुचरं पश्चाद् गच्छेत् । सूक्ष्ममतीन्द्रियं तथा देहस्य शरीरस्येन्द्रियाणां बुद्धीन्द्रियाणां च महत्तरमतिशयेन महत् । हि यस्मात्तेज आत्ममनसा संपृक्तं शरीरस्थं किल त्रिकालफलवित् त्रिकालं फलं भूतं भाव्यं भविष्यन्नृणां वेत्ति जानाति ॥

अन्यद्प्याह ॥

प्रीतये न मनो ऽनर्थे नासिद्धावभिनन्दति ।
तस्मात् सर्वात्मना यातुरनुमेयं यथा मनः ॥ [14,6]

अनर्थे विपरीतार्थे मनश्चितं न प्रीतये प्रीतिं न भजते । असिद्धौ पराजये नाभिनन्दति न तुष्टिमनुविददाति । तस्माद्धेतोर्नैमित्तिकेन च सर्वात्मना प्रयत्नेन यातुर्विजिगीषोरनुमेयं तर्कनीयं यथा मनश्चित्तमिति ॥

end, F 149

भट्टोत्पलविरचितायां यक्षेशमेधीययात्राविवृतौ । (चित्तशुद्ध्यध्यायः षोडशः ॥)

Apparatus

7 त्रिकालं ह्य वितर्थ्यणाम् C   11 त्रिकालफलवर्त्तकालं C

19 भटोत्पल° C   यक्षेश्व° C

RECENT RELEASES

1. Nṛttaratnāvalī of Jayasenāpati (Sanskrit)
   Edited by Dr. V. Raghavan
   Pp. 682 - 1967 - Price: Rs. 22-00

A treatise on Dance written in the middle of the 13th Century by Jayasenapati, a commander under the Kakatiya rulers of Warangal. Dance and its various forms form the main theme of this work. The learned editor's critical introduction covers the contribution of Andhradesa to Sanskrit Literature in general and Natyasastra in particular.

2. Tolkappiam (Collatikaram) (Tamil)
   with Kallatar's Urai
   Edited by Dr. T. P. Meenakshisundaram
   Pp. 590 - 1971 - Price: Rs. 18-00

One section of the earliest available grammer in Tamil Literature is made available to the scholarly Tamil world with a critical introduction by a competant Philologist - Tamilologist Dr. T. P. Meenakshisundaram. The critical introduction deals with the tracing of the source of Kallatar's Commentary ramified into varied versions.

3. Cuddapah Inscriptions (Telugu)
   Edited by Dr. N. Venkataramanayya
   Pp. 1270 - 1972 - Price: Rs. 45-60

The collected inscriptions, Kaifiats and other local records that form part of Mackenzie Records concerning the present Cuddapah District are published with a keen concern on principles of history by the learned Editor. The critical introduction gives a complete survey of all that part of region has to offer from the historian's point of view. Contains many blocks of inscriptions in Tamil and Persian.

Subscriptions to the Bulletin are received per Volume and *not* annually. For inland subscribers the rate is Rs. 10/- per Volume and the foreign rate is $ 2.50 or £ 1.00 or its equivalent. A trade discount of 6¼% on Bulletin purchase and 25% on Publications purchase are allowed to *bona-fide* publishers and stockists of Books.

For detailed particulars regarding the Bulletins, Publications and supply of Transcripts of Manuscripts contained in this Library.

Address.

The Curator,

Government Oriental Manuscripts Library,

University Library Buildings,

Chepauk, Madras-5.

Bharati Vijayam Press, Triplicane, Madras-5.